# श्रीभाष्ये अवस्थात्रयविचारः

(कर्नाटक-संस्कृत-विश्वविद्यालय-सम्बद्ध-यादवाद्रिस्थ-संस्कृतसंशोधनसंसदः प्रार्थनया श्रीभगवद्भाष्यकाराणां सहस्राब्दपूर्तिसन्दर्भे आयोजित-व्याख्यानमालायां शोकहर्तृपुराभिजनेन वेदवारिधिना डॉ. प. रामानुजाचार्येण बेंगलूरु-प्रकाशनगरस्थित-श्रीमदहोबिलमठस्य मालोलवेदभवने 5-12-2017 दिनाङ्के उपन्यस्तः)

**उपोद्घातः**

वेदान्ते श्रीविशिष्टाद्वैते भगवद्भाष्यकारैः प्रस्थानत्रयान्तर्गत-महर्षिबादरायणप्रणीत-ब्रह्मसूत्राणां भाष्यरूपेण पूर्वाचार्योक्तीनां मतानुसारेण व्याख्यानं श्रीभाष्यनाम्ना सर्वत्र प्रथते । तस्मिन् चेतन-अचेतन-ईश्वररूपेण त्रिविधस्य तत्वस्य विवरणस्थलेषु सूत्रार्थवैशद्यापादनार्थं बहवोंऽशाः व्याख्याताः ।

तेषु चेतनतत्वस्य, ब्रह्मणः पृथग्भूतस्य, सुरनरतिर्यक्स्थावर-रूप चातुर्विध्ययुक्तशरीरभाजः, 1 जाग्रत्-स्वप्न-सुषुप्तिरूपम् अवस्थात्रयम्, 2 उत्क्रान्तिगत्यागतिरूपम् अवस्थात्रयम्, 3 कौमार-यौवन-जराख्य अवस्थात्रयम्, 4 ज्ञातुः तस्य अज्ञान, संशय, विपर्ययरूप अवस्थात्रयम्, 5 तादृशस्यैव स्वरूप-स्थिति-प्रवृत्तिभेदेन अवस्थात्रयम्, 6 अचेतनभूत-प्रकृतेः

सृष्टि-स्थिति-संहाराख्य अवस्थात्रयेण चेतनसम्बन्धप्रकारः, 7 ईश्वरतत्वस्य तत्कारणत्वेन अवस्थानात् चेतनस्य प्रयोज्य-त्वेन अवस्थात्रयम्, 8 चेतनानां बद्ध-मुक्त-नित्यरूप अवस्था-त्रयम्, 9 ईश्वरतत्वस्य चेतन-अचेतन-विशिष्टत्व-विशेष्यत्वे इत्यादयः, अस्य उपन्यासस्य कृते पूर्वोक्त-संसदा श्रीभाष्ये अवस्थात्रयविचारः इति सामान्यतः प्रदत्ते शीर्षके अन्तर्भवितुम् अर्हन्ति ॥

एषां सर्वेषां विषये भगवद्रामानुजाचार्याणां श्रीभाष्ये उपनि-षत्-भगवद्गीता-ब्रह्मसूत्रादि-प्रमाणप्रदर्शनपुरस्सरं प्रतिपक्षप्रति-क्षेपपुरस्सरं च प्रस्तुताः वादाः अत्र सङ्गृह्यन्ते । पूर्वाचार्याणां मार्गमनुसृत्य संस्कृत-द्राविडरूप-उभयवेदान्तौ प्रमाणीकृता-वित्यपि प्रतिपाद्यते । उपन्यासोऽयं श्रोतृग्रहणसौकर्याय सं-स्कृते, द्राविड्यां, कन्नडभाषायां वा तेषां यथायथं मेलनेन वा भवन्नपि, अग्रे अस्य ग्रन्थरूपेण प्रकाशनाय लेखनेऽ-स्मिन् गैर्वाण्या वाण्या विव्रियते । अत्र सिद्धित्रय, श्रुतप्रका-शिका, भावप्रकाशिका, तत्वमुक्ताकलाप, शतदूषणी, परमत-भङ्ग, न्यायसिद्धाञ्जन, गूढार्थसङ्ग्रह-प्रभृति-ग्रन्थेभ्यः उल्लेखाः विवक्षितार्थसंवादाय भवन्ति ॥

**प्रस्तावना**

श्रीमद्वेदान्तदेशिकैः शतदूषण्यां त्रयोविंशे संविन्नानात्वनिषे-धकानुमानभङ्गवादे गायत्रीमन्त्रार्थविवरणद्वारा चेतनानाम् अवस्थाबहुत्वं प्रत्यपादि । तद्यथा -

प्रतिपुरुषमनेकाः **प्रत्यवस्थं** विचित्राः
शुभगतिषु धियो यश्चोदयत्यञ्जसा नः ।
अखिलचिदचिदन्तर्यामि तद्विष्णुसंज्ञं
सवितुरहमुपासे तस्य देवस्य भर्गः ॥ इति ।

ज्ञानस्य गुणत्वेन प्रसिद्धावपि केचिद्द्रव्यात्मकगुणाः केचित् केवलगुणा इति द्विविधा गुणाः । पूर्वे ज्ञानादयः। उत्तरे सत्त्व-रजःप्रभृतय इति ॥

आश्रयादन्यतो वृत्तेः आश्रयेण समन्वयात् । द्रव्यत्वं च गुण-त्वं च ज्ञानस्यैवोपपद्यते ॥ इति यामुनाचार्यैः सहेतुकं साधि-तत्वात् ज्ञानस्य धर्मिणो वा धर्मस्य वा द्रव्यत्वस्थापनात् द्रव्यस्यैव अवस्थावत्त्वौचित्यात् चेतनस्य संसरतः अवस्थाः विमृष्टाः उपनिषत्सु ।

ज्ञानस्य द्रव्यत्वात् संकोचविकासादि वा सङ्कल्पादि वा अवस्थादिकं युज्यते । तथाहि - उपादानं द्रव्यम् । अवस्था-श्रय उपादानम् । आगन्तुकोऽपृथक्सिद्धो धर्मोऽवस्था ।

निर्विशेषस्य वस्तुनः अप्रामाणिकत्वं सुष्ठु विस्तरेण प्रतिपादितम् ॥

## सूत्रेषु विविधावस्थात्रयविचारः

तत्र सूत्रकारैस्तावत् - जन्माद्यस्य यतः (1.1.2), सुषुप्त्युत्क्रान्त्योर्भेदेन (1.3.43), उत्क्रान्तिगत्यागतीनाम् (2.3.20), सन्ध्ये सृष्टिराह हि । निर्मातारं चैके पुत्रादयश्च । मायामात्रं तु कार्त्स्न्येनानभिव्यक्तसवरूपत्वात् । पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ । देहयोगाद्वा सोऽपि । सूचकश्च हि श्रुतेराचक्षते च तद्विदः । (3.2.1-6), भावे जाग्रद्वत् (4.4.14), तन्वभावे सन्ध्यवदुपपत्तेः (4.4.13), द्वादशाहवदुभयविधं बादरायणोऽतः (4.4.15), इत्यादिषु विमृष्टाः उपर्युक्ता बह्व्यः अवस्थाः । तासु जाग्रत्स्वप्नसुषुप्त्याख्याः प्रथमं स्वीक्रियन्ते ।

## भाष्ये अहमर्थस्यैवात्मत्वसमर्थनम्

अथ त्रिषु प्रकरणेषु जिज्ञासाधिकरणे श्रीभाष्ये आत्मस्वरूपस्थापनेदंपरपङ्क्तीः उदाहृत्य अहमर्थस्य ज्ञातुरेवात्मत्वं पूर्वं प्रस्तूयते । तेन जीवात्मनः अवस्थात्रयं धर्मभूतस्य ज्ञानस्य संकोचविकासाभ्यामेवेति सम्यक् अवगन्तुं शक्यते । तथाहि

1. अतः भाष्ये अहमर्थात्मत्वसमर्थने भाषितं -

‘अहमर्थो न चेदात्मा प्रत्यक्त्वं नात्मनो भवेत् ।
अहम्बुद्ध्या परागर्थात् प्रत्यगर्थो हि भिद्यते ॥
निरस्ताखिलदुःखोऽहमनन्तानन्दभाक् स्वराट् ।
भवेयमिति मोक्षार्थी श्रवणादौ प्रवर्त्तते ॥
अहमर्थविनाशश्चेन्मोक्ष इत्यध्यवस्यति ।
अपसर्पेदसौ मोक्षकथाप्रस्तावगन्धतः ॥
मयि नष्टेपि मत्तोऽन्या काचिज्ज्ञप्तिरवस्थिता ।
इति तत्प्राप्तये यत्नः कस्यापि न भविष्यति ॥
स्वसम्बन्धितया ह्यस्याः सत्ताविज्ञप्तितादि च ।
स्वसम्बन्धवियोगे तु ज्ञप्तिरेव न सिद्ध्यति ॥
छेत्तुश्छेद्यस्य चाभावे छेदनादेरसिद्धिवत् ।
अतोऽहमर्थो ज्ञातैव प्रत्यगात्मेति निश्चितम् ॥
‘विज्ञातारमरे केन’, ‘जानात्येवे’ति च श्रुतिः । (बृ.४-५-१५)
‘एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ’ इति च स्मृतिः ॥ (गी.१३-२)
‘नात्मा श्रुते’रित्यारभ्य सूत्रकारोऽपि वक्ष्यति ।(ब्र.सू.२-३-१८)
‘ज्ञोऽत एवेत्यतो नात्मा ज्ञप्तिमात्रमिति स्थितम्’ ॥ ......

2. एवमात्मा चिद्रूप एव चैतन्यगुणक इति । चिद्रूपता हि स्वयम्प्रकाशता ॥

तथा हि श्रुतयः ‘स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघनः एव एवं वा अरेऽयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव’, (बृ.६-५-१३) ‘विज्ञानघन एव’, ‘अत्रायं पुरुषः स्वयंज्योतिर्भवति’, (बृ.६-३-९-१४) न (हि) विज्ञातुर्विज्ञातेर्वि-परिलोपो विद्यते’, (बृ.६-३-३०) ‘अथ यो वेदेदं जिघ्राणीति स आत्मा’, (छा.८-१२-४) ‘कतम आत्मेति । योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः’, (बृ.६-३-७)‘एष हि द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः’, (प्र.४-९) ‘विज्ञातारमरे केन विजानीयात्’, (बृ.४-४-१४) ‘जानात्येवायं पुरुषः’, ‘न पश्यो मृत्युं पश्यति न रोगं नोत दुःखताम्’, (छा.७-२६-२) ‘स उत्तमः पुरुषः...नोपजनं स्मर-न्निदं शरीरम्’, (छा.८-१२-३) ‘एवमेवास्य परिद्रष्टुरिमाष्षोडश कलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति’, (प्र.६-५) ‘तस्माद्वा एतस्मान्मनोमयात् अन्योऽन्तर आत्मा विज्ञान-मयः’, (तै.२-४-१) इत्याद्याः । वक्ष्यति च, ‘ज्ञोऽत एव’ (ब्र.सू. २-३-१९) इति । अतः स्वयम्प्रकाशोऽयमात्मा ज्ञातैव; न प्रकाशमात्रम् । प्रकाशत्वादेव कस्यचिदेव भवेत् प्रकाशः दीपादिप्रकाशवत् । तस्मात् नात्मा भवितुमर्हति संवित् । संविदनुभूतिज्ञानादिशब्दाः सम्बन्धिशब्दा इति च शब्दार्थ-

विदः । न हि लोकवेदयोः जाना(ती)त्यादेरकर्मकस्याकर्तृक-स्य च प्रयोगो दृष्टचरः ॥

यच्चोक्तम् - अजडत्वात् संविदेवात्मेति - तत्रेदं प्रष्टव्यम् । अजडत्वमिति किमभिप्रेतम् ॥ स्वसत्ताप्रयुक्तप्रकाशत्वमिति चेत् - तथासति दीपादिषु अनैकान्त्यम् । संविदतिरिक्तप्रकाश-धर्मानभ्युपगमेनासिद्धिर्विरोधश्च ।

अव्यभिचरितप्रकाशसत्ताकत्वमपि सुखादिषु व्यभिचारान्निर-स्तम् । यद्युच्येत - सुखादिरव्यभिचरितप्रकाशोऽपि अन्यस्मै प्रकाशमानतया घटादिवत् जडत्वेन अनात्मा इति - ज्ञानं वा किं स्वस्मै प्रकाशते? तदपि ह्यन्यस्यैवाहमर्थस्य ज्ञातुरव-भासते, अहं सुखीतिवत् जानाम्यहमिति । अतः स्वस्मै प्रका-शमानत्वरूपमजडत्वं संविदि असिद्धम् । तस्मात् स्वात्मानं प्रति स्वसत्तयैव सिध्यन् अजडोऽहमर्थ एवात्मा । ज्ञानस्यापि प्रकाशता तत्संबन्धायत्ता । तत्कृतमेव हि ज्ञानस्य सुखादे-रिव स्वाश्रयं प्रति प्रकटत्वम्, इतरं प्रति अप्रकटत्वञ्च । अतो न ज्ञप्तिमात्रमात्मा, अपि तु ज्ञातैवाहमर्थः ॥

3. अतोऽन्तःकरणभूताहङ्कारस्थतया संविदुपलब्धेर्वस्तुतो दोषतो वा न किञ्चिदिह कारणमिति नाहङ्कारस्य ज्ञातृत्वं तथोपलब्धिर्वा । तस्मात्स्वत एव ज्ञातृतया सिद्ध्यन्नहमर्थ

एव प्रत्यगात्मा । न ज्ञप्तिमात्रम् । अहम्भावविगमे तु ज्ञप्ते-रपि न प्रत्यक्त्वसिद्धिरित्युक्तम् ॥

*अत्रत्यश्रुतप्रकाशिका* - एवं परपक्षे न संभवतीत्याह अत इति । वस्तुतः कारणं धर्मधर्मिभावः; दोषस्तु तात्स्थ्येनोपलब्धि-कारणं मूर्तस्वच्छस्थूलद्रव्यत्वम् । उभयमप्यहङ्कारे नास्ती-त्यर्थः । वस्तुतः कारणाभावान्न ज्ञातृत्वं विद्यते, दोषरूपकार-णाभावान्नोपलभ्यते चेत्यभिप्रायेणाह नाहङ्कारस्य ज्ञातृत्वं तथोपलब्धिर्वेति । ज्ञातुरात्मत्वं निगमयति तस्मादिति । ज्ञप्तेरात्मत्वमयुक्तम्, अहंत्वाभावे प्रत्यक्त्वायोगादित्याह अहम्भाव(न?)विगम इति । अहमिति व्यवहारानुगुणभासन-विरहे स्वस्मै भासमानत्वं न स्यात् । अतः प्रत्यक्त्वमप्यह-मर्थस्यैवात्मत्वसाधकमित्यर्थः । इति ।

अस्य *भावप्रकाशिकायाञ्च* - भाष्ये वस्तुतो दोषतो वा न किंचिदिह कारणमितीति । वस्तुरूपं वा दोषरूपं वा न किं-चित् कारणमित्यर्थः । प्रत्यक्षप्रमायां हि वस्तुशब्दवाच्यो विषयो हेतुः । अतो वस्तुनः कारणत्वमुपपद्यत इति द्रष्टव्यम् । धर्मधर्मिभावेन वस्तुत इति । तसेः सार्वविभक्तिकत्वात् वस्तुना = धर्मधर्मिभावेनेत्यर्थः । मूर्तस्वच्छस्थूलद्रव्यत्वमि-ति । मूर्तस्वच्छस्थूलद्रव्यत्वप्रयुक्तं चाक्षुषतेजःप्रतिफलनरूपं तात्स्थ्येनोपलब्धौ दोषरूपं कारणमित्यर्थः । वस्तुतः कार-

णाभावान्न ज्ञातृत्वं विद्यत इति । धर्मधर्मिभावात्मकस्य वस्तुरूपकारणस्याभावान्न ज्ञातृत्वं प्रतीयत इत्यर्थः । अतः प्रत्य-क्त्वमपीति ज्ञप्तेरपि न प्रत्यक्त्वसिद्धिरिति भाष्ये अपिर्भि-न्नक्रमः । प्रत्यक्त्वसिद्धिरपि नेत्यन्वय इति ॥

**भाष्यम्**

तमोगुणाभिभवात्परागर्थानुभवाभावाच्चाहमर्थस्य विविक्त-स्फुटप्रतिभासाभावेऽपि आप्रबोधात् अहमित्येकाकारेणाऽऽत्म-नः स्फुरणात् सुषुप्तावपि नाहम्भावविगमः । भवदभिमताया अनुभूतेरपि तथैव प्रथेति वक्तव्यम् । न हि सुषुप्तोत्थितः कश्चित् अहम्भावावियुक्तार्थान्तरप्रत्यनीकाकारा ज्ञप्तिरहमज्ञा-नसाक्षितयाऽवतिष्ठे इत्येवंविधां स्वापसमकालामनुभूतिं परा-मृशति ।

॥ **सुषुप्त्यादावहमर्थस्फुरणसमर्थनम्** ॥

एवं हि सुषुप्तोत्थितस्य परामर्शः, सुखमहमस्वाप्समिति । अनेनैव(अनेन) प्रत्यवमर्शेन तदानीमप्यहमर्थस्यैवाऽऽत्मनः सुखित्वं ज्ञातृत्वञ्च ज्ञायते ।

*अत्रत्यश्रुतप्रकाशिका* - अथ सुषुप्तावहमर्थस्फुरणमस्तीति सा-धयितुम् 'वेदान्तावलम्बिभिः सर्वैः स्वयंज्योतिष्ट्वश्रुत्यनुसा-

रात् सुषुप्तावात्मस्फुरणमभ्युपेत्यम् । तत्र, ‘नाह खल्वयमेवं संप्रत्यात्मानं जानाति अयमहमस्मि’ इति श्रुत्या, ‘मामप्यहं न ज्ञातवान्‘ इति परामर्शाच्च नाहमर्थानुभवः । अतोऽनुभूतिस्फुरणमेव तदानीम् इति शङ्कायामहमर्थस्याविशदस्फुरणमस्तीति सोपपत्तिकं प्रतिजानीते तम इत्यादिना । चस्त्वर्थः शङ्कानिवृत्तौ । तमोगुणाभिभवहेतुकात् परागर्थानुभवाभावात् स्फुटावभासाभावः । विविक्तप्रतिभासः - व्यावृत्तप्रतिभासः । अनेकविशेषणविशिष्टावभासः स्फुटावभासः । व्यावर्तकब्राह्मणत्वादिबाह्यधर्मविशिष्टत्वेन बुद्धिसुखाद्यान्तरधर्मविशिष्टत्वेन च प्रतिभासाभावात्, सकलेतरव्यावृत्ततया स्फुटतया च प्रतिभासाभावः । केनाकारेण स्फुरतीत्यत्राह अहमित्येकाकारेण स्फुरणादिति ।

अहमिति न शब्दानुकारः; अपित्वेतद्वाच्यार्थानुकारः । प्रत्यक्त्वाकारेण स्फुरणादित्यर्थः । एकशब्देन अहम्भावाविगमो विवक्षितः । यद्वा एकाकारेण - सर्वात्मसाधारणाकारेणेत्यर्थः । प्रत्यक्त्वादिको हि सर्वात्मसाधारणः । सुखदुःखादयो देवत्वादयश्च न हि सर्वात्मसाधारणाः । सुषुप्तौ भासमान आत्मन्यहम्भावः साध्यः; तथा स्फुरणं हेतुः । विशदावभासाभावादहमर्थस्फुरणं नास्तीत्यत्राह भवदभिमताया अनुभूतेरपीति । न केवलमहमर्थस्फुरणे एव अवैशद्यदोषः; अनुभूतिस्फुरणेऽपि

स त्वया वाच्यः (स तुल्यः) । अतो विशदावभासाभावात् नास्तित्वं चेत्, ज्ञप्त्यात्मनोऽपि तदानीं स्फुरणं न स्यात् । 'ज्ञातृज्ञेयोपश्लेषविरहात् स्फुटानवभासः' इति हि तदभ्युपगम इत्यभिप्रायः । मृषावादिभिर्वाद्यन्तरैरपि जागरितावस्थायामेव अविशदावभासो निर्विकल्पकेऽङ्गीकृतः । ते यदि विशदावभासाभावदहमर्थास्फुरणं ब्रूयुः, तत्रापि - निर्विकल्पके पृथक्पृथग्वस्तुमात्रावभासाभ्युपगमो नोपपद्यते । अविशदवस्तुमात्रावभासः परैरप्रामाणिको निर्विकल्पके स्वीकृतः; अत्र तु, 'अत्रायं पुरुषः स्वयंज्योतिर्भवति' इत्यादिश्रुत्यनुसारादविशदावभासः प्रामाणिकः स्वीकृत इति भिदा । अतः सुषुप्तावात्मस्फुरणाभ्युपगमे अविशदावभासाभ्युपगमे च तुल्येपि मृषावादिमतादपि स्वपक्षे प्रमाणानुगुण्यं विवक्षुः परपक्षे प्रमाणाननुगुणत्वं दर्शयति न हीति । अहम्भाववियुक्तार्थान्तरप्रत्यनीकाकारा - ज्ञातृज्ञेयादिसमस्तविशेषरहितेत्यर्थः । प्रत्यक्त्वसिध्द्यर्थं ज्ञप्तिरहमिति अत्राहंशब्दोपादानम् । स्वपक्षे परामर्शानुगुण्यमाह एवं हीति । अयं परामर्शः सुषुप्तिकाले सुखरूपतयाऽनुभूतात्मगोचरः । अतीतकालसम्बन्धस्वापौ तु पूर्वकालानुभूतार्थप्रत्यभिज्ञानयोग्यानुपलब्धिभ्यामनुमेयौ । स्वतोऽनुकूलतयाऽवभासमानस्य अहमर्थस्याऽनुमानिककालस्वापवैशिष्ट्यगोचरप्रत्यभिज्ञाविशेषोऽयं परामर्शः सुखमहम-

स्वाप्समिति । एवं स्वपरमतयोः परामर्शानुगुण्यतदभावरूप-वैषम्यमुक्तम् । श्रुतिस्वारस्यं च अस्मन्मते; 'अत्रायं पुरुषः-स्वयंज्योतिः' इति पुरुषशब्दश्रवणात् । पुरुषशब्दो न संविन्मात्रपरः । 'एष हि द्रष्टा श्रोता रसयिता घ्राता मन्ता बोद्धा विज्ञानात्मा पुरुषः' इति ज्ञातुरेव पुरुषत्वश्रवणात्; लोके ज्ञातरि पुरुषशब्दप्रसिद्धेश्च । प्रत्यक्त्वसिद्धिश्चास्मन्मत एवेति वक्ष्यते । उक्तपरामर्शफलितमर्थमाह अनेनेति ।

*भावप्रकाशिकायाञ्च* - अनुभूतेरपि तथैवं प्रथेति वक्तव्यमिति भाष्ये तथैवेत्यस्य विशदावभासत्वेनेत्यर्थमभिप्रेत्यावतारयति - विशादावभासाभावादिति । ननु तथा-शब्दस्याहंत्वेनेत्यर्थ एवास्तु । एवं च न हि सुप्तोत्थितः इति भाष्यमपि तदुपपादकतया तच्छेषभूतमस्त्विति चेत् - सत्यम्, युक्त्यन्तराविष्करणार्थमेवं व्याख्योपपत्तेः । जागरितावस्थायामेवेति । अविशदावभासायोग्यावस्थायामप्यविशदावभासाभ्युपगमे तद्योग्यावस्थायां तदभ्युपगन्तॄणां का नः क्षतिरित्यर्थः॥

*श्रुतप्रकाशिकायां* पुनः - सुखमहमस्वाप्समिति परामर्शे सुखमित्यनेन तदानीमनुकूलतया भानमनुसंहितं भवति । अहमित्यनेन स्वस्मै भासमानत्वरूपप्रत्यक्त्वं चानुसंहितं भवति । यथा मन्दमगच्छम्, मधुरमगायमिति परामर्शेन पूर्वं गमनगानाभ्यां सह तदानीन्तनं मान्द्यं माधुर्यं चानुसंहितं भवति,

तद्वदित्यर्थः । स्वस्मै स्वयमनुकूलमित्यानुकूल्यप्रतियोगित्वाभिप्रायेण सुखित्वमित्युक्तम्; स्वस्मै भासत इति भासनप्रतिसम्बन्धित्वरूपप्रत्यक्त्वाभिप्रायेण ज्ञातृत्वमित्युक्तम्; न तु धर्मभूतज्ञानस्फुरणात् । तत्तु, 'विषयप्रकाशनवेलायां ज्ञातुरात्मनस्तथैव; न तु सर्वेषां सर्वदा तथैव' इति भाष्यस्वारस्यविरुद्धम् । 'पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् इति सूत्रस्वारस्यविरुद्धञ्च । अस्मरणनियमाद्युपपत्तिविरुद्धञ्च । संसारदशायां मनोव्यापारविरहेऽपि ज्ञानस्याऽत्मविषयत्वम्, 'तच्चेन्द्रियद्वारेण व्यवस्थितम्' इति भाष्यस्वारस्यविरुद्धं च । अन्यथा एषां सूत्रभाष्यवचसां सङ्कोचः स्यात् । स च सङ्कोचकाभावादनुपपन्नः । तस्मात् तदानीमात्मा प्रत्यक्त्वेनानुकूलत्वेनानुसंहित इति परामर्शफलितार्थः ॥ सुखमहमस्वाप्समिति सुखस्य स्वापक्रियाविशेषणत्वे प्रतीयमाने कथमात्मविशेषणत्वमुच्यत इति चेत् - नैवम् । क्रियायाः सुखाश्रयत्वायोगेन पुरुषद्वारा क्रियाविशेषणत्वस्य युक्तत्वादिति । आत्मनस्तदानीं 'न किञ्चिदवेदिषम्' इत्यज्ञानसाक्षित्वेन स्थितिं वदता अज्ञानाश्रयभूताहमर्थानुभवोऽभ्युपगन्तव्यः;

*भावप्रकाशिकायां* -

प्रत्यक्त्वसिद्ध्यर्थमिति । अतोऽहंभाववियुक्तेत्यनेन विरोध इति भावः । प्रत्यभिज्ञाविशेषोऽयमिति । 'सुखमहम्' इत्यंशे

स्मृतिरूपः, 'अस्वाप्सम्' इति स्वापांशे कालांशे च प्रत्यभिज्ञायोग्यानुपलब्धिरूपलिङ्गद्वयप्रतिसंधानजन्यानुमितिरूपो नृसिंहाकारज्ञानविशेष इत्यर्थः । ननु - स्मृते पर्वते वह्निव्याप्यधूमवत्त्वज्ञानात् 'पर्वतो वह्निमान्' इत्यनुमितिः पर्वतांशेऽप्यनुमितिरूपा; न स्मृतिरूपा । एवं स्मृते सुखरूपे आत्मनि स्वापकालयोः संबन्धानुमितिरात्मांशेऽप्यनुमितिरूपैव; न तु परामर्शरूपा । अनुमितित्वस्याव्याप्यवृत्तित्वासंभवात् । अस्तु वाऽनुमितत्वमव्याप्यवृत्ति । तथापि 'सुखमहम्' इति ज्ञानमिदानींतनसुखरूपाहमर्थविषयकं कुतो न स्यात्? न हि तदंशे तत्तोल्लेखोऽस्ति, येन स्मृतित्वं स्वध्यवसानं स्यात् । स्वापकालीनानुभवस्य देशकालाद्यगोचरत्वेन स्वापकालीनात्मनि व्यावर्तकाकारस्य कस्याप्यभावेन तस्य पक्षीकरणासंभवेनानुमानेन कीदृशे आत्मनि स्वापसंबन्धो बोध्येत? तस्मादात्मनि स्वापदशायां यावत् धर्मान्तरसंबन्धोऽवभासत इति नाङ्गीक्रियते, तावत् 'सुखमहम्' इत्यस्य स्वापकालीनसुखानुसंधानरूपत्वं न सूपपादम् । तस्मादेतत्प्रघट्टकं सर्वं न सुन्दरमिति चेत् - अत्राहुः - सुषुप्तिदशायां जाग्रद्दशाविलक्षणमानुकूल्यं भासत इति सिद्धम् । तच्च न स्वरूपभूतज्ञानेन । तथात्वे जागरितदशायामपि तदानुकूल्यं भासेत । ततश्च यथा कैवल्यदशायां भासमानस्य विलक्षणस्यानुकूल्यस्य न

स्वरूपभूतज्ञानप्रकाश्यत्वम्, एवं सुषुप्तिदशायामपि भासमाना-नुकूल्यं धर्मभूतज्ञानेनैव भासते । जाग्रद्दशायां तु जाग्रद्भोगप्र-दकर्मप्रतिबन्धवशात् तदानुकूल्यं धर्मभूतज्ञाने न विषयः । सुषुप्तिदशायां तु विषय एव । ततश्च तादृशविषयलाभात् तज्ज्ञानस्य स्वप्रकाशत्वम् । अत एव सुखित्वं ज्ञातृत्वं च ज्ञायत इति भाष्यमपि सुसंगतम् । बहिर्विषयप्रसरे परमि-न्द्रियापेक्षा । अत एव, 'इन्द्रियद्वारेण व्यवस्थितमिति भाष्य-मपि संगतमेव । ततश्च धर्मभूतज्ञानेनानुकूल्यविशेषवत्तया जाग्रदादिविलक्षणस्मरणं संभवति । तस्यानुभवस्य संस्का-राधायकतासंभवेन स्मरणमपि संभवति, तद्दशायां कालस्या-पि धर्मभूतज्ञानेन विषयीकरणसंभवात्, कालस्य ज्ञानमात्रवि-षयत्वात्, तत्कालीने आनुकूल्यविशेषवत्तया स्मृते आत्मनि ज्ञानाभावरूपस्वापस्य योग्यास्मरणलिङ्गगम्यत्वसंभवात्, स्वापांशस्यापि तदानुभवेऽपि बाधकाभावात्, सर्वांशे परामर्श-स्य स्वरससिद्धत्वाच्चेति । वस्तुतस्तु धर्मभूतज्ञानेन व्याव-र्तकाकारास्फुरणेऽपि जाग्रद्दशाविलक्षणे प्रमुष्टसत्ताकस्मृतिगो-चरेऽतिशयितसुखविशेष आत्मनि तदानींतनार्थास्मरणलि-ङ्गेन ज्ञानाभावरूपस्वापस्य वा तस्य स्वापस्येदानीमसत्त्वेन लिङ्गेन स्वापगतातीतत्वस्य वानुमाने दोषाभावान्नानुपप-त्तिरिति द्रष्टव्यम् ।

*॥ अहमर्थात्मस्फुरण समर्थनम् ॥*

तच्चेन्द्रियद्वारेण व्यवस्थितमिति भाष्यस्वारस्यविरुद्धं चेति । 'क्षेत्रज्ञावस्थायां कर्मणा संकुचितस्वरूपं तत्तत्कर्मानुगुणतरतमभावेन वर्तते । तच्चेन्द्रियद्वारेण व्यवस्थितम्' इति भाष्यविरुद्धमित्यर्थः ।

**भाष्ये** - न च वाच्यम् - यथेदानीं सुखं भवति तथा तदानीमस्वाप्समित्येषा प्रतिपत्तिरिति - अतद्रूपत्वात् प्रतिपत्तेः । न चाहमर्थस्यात्मनोऽस्थिरत्वेन तदानीमहमर्थस्य सुखित्वानुसन्धानानुपपत्तिः; यतः सुषुप्तिदशायाः प्रागनुभूतं वस्तु सुप्तोत्थितः, 'मयेदं कृतम्, मयेदमनुभूतम्, अहमेतद(वम)वोचमिति परामृशति ॥

*श्रुतप्रकाशिका* - यथा प्रातश्चत्वरे गजो नासीदिति परामर्शे पूर्वं गजाभावाश्रयभूतं चत्वरमनुसंहितं भवति, तद्वत् । अस्वाप्समिति परामर्शेन मन्दमगच्छमित्यत्र गमनवत् स्वापोऽपि तदाऽनुसंहितः स्यादिति चेन्न; यथा प्रातश्चत्वरे गजो नासीदित्यत्र पूर्वं गजाभावाननुसन्धानेऽपि एवं परामर्शोपपत्तिः, तद्वत् सकलज्ञाननिवृत्तिरूपस्वापस्य तदानीमननुसंहितत्वेऽप्येवं परामर्शोपपत्तेः । तत्र हि प्रातश्चत्वरमेवानुभूतम्, न गजाभावः; प्रतियोगिभूतगजास्मरणात् । पश्चात्, 'गजः किं

स्थितः' इति पृष्टेन योग्यार्थाननुस्मरणलिङ्गेन अभावोऽनुमीयते । तद्वत् सकलज्ञाननिवृत्तिरूपस्वापोऽपि योग्याननुस्मरणलिङ्गेनाऽनुमीयते ॥ ननु सुखमहमस्वाप्समिति परामर्शस्वरूपे सति स्वापादेस्तदानीमननुभवः सुखित्वादेरनुभवश्च कथमुच्यते? सर्वमप्यनुभूतं स्यात्; न वा स्यात् ॥ नैतत् ॥ सुखमहमस्वाप्समित्यत्र यस्मिन्नंशे प्रतीतिस्वारस्यापवादकमस्ति, तद्विषयप्रतिपत्तिस्वारस्यभङ्गेऽप्यनपोदितांशविषयप्रतिपत्तिस्वारस्यभङ्गायोगात् । तत्र स्वापदशायां योऽर्थो नानुभवितुं शक्यः, तद्विषयप्रतिपत्तिस्वारस्यं भज्यते । यस्तु तदानीमनुभवयोग्यः, तद्विषयप्रतिपत्तिस्वारस्यं तिष्ठत्येव । बाह्यान्तः-(न्तर?)करणजन्यसमस्तज्ञानाभावरूपत्वात् स्वापः तदाऽनुसन्धातुं न शक्यते । अनुसन्धानमस्तीति चेत् - स्वाप एव न स्यात्; ऐन्द्रियिकसमस्तज्ञाननिवृत्त्यभावात् । नैवं सुखादेः प्रतिपत्त्यनुपपत्तिरिति यथोक्त एवार्थः ॥

अथाऽस्य परामर्शस्य परोक्तान्यथासिद्धिमनूद्य परिहरति न चेत्यादिना । अतद्रूपत्वादिति । एवमर्थः किं प्रतिपक्षिस्वारस्यात् उतानुपपत्त्याऽभ्युपगम्यते इति विकल्प्य, अतद्रूपत्वात्प्रतिपत्तेरिति प्रतिपत्तिस्वारस्यं परिहृतम्; यथा मन्दमगच्छम् मधुरमगायमिति परामर्शवचनस्य । न हि तत्र, यथेदानीं मान्द्यं माधुर्यं च भवति तथा अगच्छमगायमित्यर्थः उपपद्यते

। अपितु गतिगानसमकालत्वमेव मान्द्यमाधुर्ययोरुपपन्नम् । तद्वत् प्रत्यक्त्वसुखित्वे अपि स्वापसमकालीने इत्यर्थः । अथानुपपत्तिं परिहरति न चेत्यादिना । अनुपपत्तिश्चाऽऽत्मनः अस्थिरत्वमनुभवाभावो वा ।

*भावप्रकाशिकायाञ्च* - न किंचिदवेदिषमित्यज्ञानसाक्षित्वेन स्थितिं वदतेति । सुप्तोत्थितस्य न किंचिदवेदिषम्' इत्याकारकस्मरणान्यथानुपपत्तिकल्पितं सुषुप्तिकालीनं 'न जानामि' इति यदज्ञानसाक्षित्वम्, तेनेत्यर्थः । ततश्च सुषुप्तिदशायां 'न वेद्मि' इत्यज्ञानानुभवसंभवेऽपि 'नावेदिषम्' इत्याकारकाज्ञानानुभवासंभवात् कथमेतदिति न चोदनीयम् । अज्ञानाश्रयभूताहमर्थेति । अहमर्थस्याज्ञानाश्रयत्वमप्यभ्युपगन्तव्यम् । तद्भानमप्यभ्युपगन्तव्यमित्यर्थः । यथा प्रातश्चत्वरे गजो नास्तीति । इदं गजाभावविशिष्टतयानुभूतस्य चत्वरस्य यदा स्मरणं तदेति द्रष्टव्यम् । परमते 'न किंचिदवेदिषम्' इत्यस्य सर्वांशे परामर्शरूपत्वात्तदनुसारेण दृष्टान्तस्य वक्तव्यत्वात् । उत्तरत्र तु सिद्धान्ते धर्म्यंश एव परामर्शरूपत्वात् तद्दृष्टान्ततया स्वमतानुगण्येन वक्ष्यमाणा 'चत्वरे गजो नास्ति' इति योग्यानुपलब्धिलिङ्गकगजाभावानुमितिश्चत्वरांश एव परामर्शरूपा । अतश्चत्वरमात्रं यत्र प्रागनुभूतं तादृशमेवोत्तरत्रोदाहरिष्यते, स्वमतानुगुण्यादिति द्रष्टव्यम् । परमतवत् त्वन्मते-

ऽपि 'सुखमहमस्वाप्सम्' इति सर्वांशेऽपि परामर्शत्वमेव स्यादिति शङ्कते - अस्वाप्समिति परामर्शेनेति । अनुसंधानमस्ति चेत् स्वाप एव न स्यादिति । ननु बाह्यान्तःकरणजन्यसमस्तज्ञानाभावेऽपि साक्षिणैव स्वापशब्दिताज्ञानानुभवसंभवान्न सुषुप्तिव्याघात इति चेत् - न; अज्ञानस्य साक्षिभास्यत्वे प्रमाणाभावादिति भावः ।

परोक्तान्यथासिद्धिमिति । सुषुप्तौ सुखानुभवानभ्युपगन्तृनैयायिकाद्युक्तान्यथासिद्धिमित्यर्थः । न तु मृषावाद्युक्तेति मन्तव्यम्, मृषावादिभिः सुखानुभवस्यैवाभ्युपेतत्वात् ।

**भाष्यम्** - 'एतावन्तं कालं न किञ्चिदहमज्ञासिषमिति च परामृशतीति चेत्-ततः किम् ॥ न किञ्चिदिति कृत्स्नप्रतिषेध इति चेत्-न; नाहमवेदिषमिति वेदितुरहमर्थस्यैवानुवृत्तेः । वेद्यविषयो हि स प्रतिषेधः । न किञ्चिदिति निषेधस्य कृत्स्नविषयत्वे भवदभिमतानुभूतिरपि प्रतिषिद्धा स्यात् । सुषुप्तिसमये तु अनुसन्धीयमान-महमर्थमात्मानं ज्ञातारम् अहमिति परामृश्य, न किञ्चिदवेदिषमिति वेदने तस्य प्रतिषिध्यमाने तस्मिन् काले निषिद्ध्यमानाया वित्तेः सिद्धिम् अनुवर्त्तमानस्य ज्ञातुरहमर्थस्य चासिद्धिमनेनैव, 'न किञ्चिदहमवेदिषम्' इति परामर्शेन साधयंस्तमिममर्थं देवानामेव साधयतु ॥

मामप्यहं न ज्ञातवानित्यहमर्थस्यापि तदानीमननुसन्धानं प्रतीयत इति चेत्-स्वानुभवस्ववचनयो-र्विरोधमपि न जानन्ति भवन्तः । अहं मां न ज्ञातवानिति ह्यनुभववचने । मामिति किं निषिद्ध्यत इति चेत् -

अत्रत्यश्रुतप्रकाशिका - तत्र परामर्शेन स्थिरत्वमाह यत इति । मयेदं कृतमित्यादयो मानसवाचिककायिकत्रिविधव्यापार-विषयपरामर्शपराः । अथाहमर्थाननुभवसाधकनिषेधसामान्य-विषयं परामर्शं (र्शविशेषं) शङ्कते एतावन्तमिति । अहमर्थस्य निषेधविषयत्वाभावाभिप्रायेणाऽऽह ततः किमिति । परविवक्षितं शङ्कते न किञ्चिदिति । परिहरति नेति । वेद्यविषयः - वेद्यप्रतिभासविषयः । कृत्स्नविषयत्वेऽनिष्टमाह न किञ्चिदिति । नानुभूतिनिषेधः, तस्या अनुवृत्तेरित्याशङ्क्याह सुषुप्तिसमये त्विति । भवत्पक्षस्य विपरीतोऽयं परामर्श इत्यर्थः । यथा प्रातश्चत्वरे गजानुभवं पृष्टेन पश्चात् योग्याननुस्मरणलिङ्गेन चत्वरे गजाभावं वदता पुरुषेण पूर्वकालीनचत्वरानुभवेन विना गजाभावो न वक्तुं शक्यते - तथा अज्ञानाश्रयमहमर्थं वदता स्वापवेलायामहमर्थानुभवोऽभ्युपगन्तव्यः । अथाप्यहमर्थनिवृत्तिज्ञानानुवृत्तिकथनं चत्वरनिवृत्तिगजावस्थानवचनतुल्यमिति भावः । देवानामेव साधयतु । अर्चारूपा हि देवाः । प्रतिवचनमकुर्वतामित्यर्थः

। क्षमावतामिति वा, प्रतिवाद्यसन्निधाविति वा, उल्लोकमुक्त-मिति वाऽर्थः ॥

अथ निषेधविशेषविषयं परामर्शमाह मामपीति । परिहरति स्वानुभवेति । स्वानुभववचनयोर्नान्योन्यं विरोधः; किन्तूभयोरप्यहमर्थानुवृत्तिनिषेधशब्देन विरोधः इत्यर्थः । अनुभवैकदेशयोर्वचनैकदेशयोश्च मिथो विरोध इति वाऽर्थः । विरोधमेव दर्शयति अहमिति ।

*भावप्रकाशिकायाम्* - न च 'सुखपरामर्शो दुःखाभावनिमित्तः' इति पञ्चपादिकायामुक्तत्वात् मृषावादिभिरपि सुखानुभवाभावोऽभ्युपेत इति वाच्यम्, तद्व्याख्यात्रा विवरणकृता तस्य परमतोपन्यासरूपत्वाविष्करणात् । वस्तुतस्तु अहमर्थसदसद्भावचिन्तनप्रकरणत्वात् यथेदानीं सुखं भवतीति भाष्यस्य 'सुखं यथेदानीमहं(?) भवति तथास्वाप्सम्' इत्येवमर्थपरतया व्याख्येयत्वात् मृषावादिमतेऽपीदृशोक्तेः संभवात् तन्मतेपि नानुपपत्तिरिति द्रष्टव्यम् । अस्थिरत्वमनुभवाभावो वेति । तदानीमहमर्थतदनुभवाभावे अहमर्थसुखित्वप्रतिसंधानानुपपत्तिवशात् 'इदानीं यथा सुखम्' इत्याद्यनुभवप्रकारः पर्यवस्यतीति भावः । अहमर्थस्य निषेधविषयत्वेति । अहमर्थानुभवस्येत्यर्थः । भाष्ये - नाहमवेदिषमिति वेदितुरिति । 'नाहमवेदिषम्' इत्यत्राहमित्यंशस्य सुषुप्त्यनुभूतार्थस्मृतिरूपतया

स्मृतेश्च स्मर्यमाणस्वरूपमात्रे प्रामाण्यसंभवात् । न च नैयायिकादिमत इव तदंशेऽप्यनुभवत्वमस्त्विति शङ्क्यम्, स्मृतित्वस्यानुभवसिद्धत्वादिति भावः । एतेन ‘राममहं नाद्राक्षम्’ इत्यादाविव तदानीमहमर्थाभावेऽपि ‘नाहमवेदिषम्’ इत्यहमर्थेऽतीतज्ञानसंबन्धित्वादिनिषेधेऽनुपपत्त्यभावात् कथमेतदिति शङ्का निरस्ता । वेद्यप्रतिभासविषय इति । न वेदितृप्रतिभासविषय इत्यर्थः । अथाप्यहमर्थनिवृत्तीति । अहमर्थज्ञानाभावेत्यर्थः । चत्वरनिवृत्तीति चत्वरज्ञाननिवृत्तीत्यर्थः । ‘अहमर्थानुभवाभावसाधकं परामर्शं शङ्कते’ इत्यवतारिकाप्रदर्शनादित्थं द्रष्टव्यम् । यद्वा अहमर्थानुभवाभावोऽप्यहमर्थाभावपर्यवसित इति न विरोध इति द्रष्टव्यम् ।

**भाष्यम्** - साधु पृष्टं भवता । तदुच्यते । अहमर्थस्य ज्ञातुरनुवृत्तेः न स्वरूपं निषिध्यते अपि तु प्रबोधसमयेऽनुसन्धीयमान(नाऽ?)स्याहमर्थस्य वर्णाश्रमादिविशिष्टता । अहं मां न ज्ञातवानित्युक्ते विषयो विवेचनीयः । जागरितावस्थानुसंहित जात्यादिविशिष्टोऽस्मदर्थो मामित्यंशस्य विषयः । स्वाप्ययावस्थाप्रसिद्धाविशदस्वानुभवैकतानश्चाहमर्थोऽहमित्यंशस्य विषयः । अत्र सुप्तोऽहमीदृशोहमिति च मामपि न ज्ञातवानहमित्येव स्वल्वनुभवप्रकारः ॥

किञ्च - सुषुप्तावात्मा अज्ञानसाक्षित्वेनाऽस्त इति हि भवदीया प्रक्रिया । साक्षित्वञ्च साक्षाज्ज्ञातृत्वमेव न ह्यजानतः साक्षित्वम् । ज्ञातैव हि लोकवेदयोः साक्षीति व्यपदिश्यते; न ज्ञानमात्रम् । स्मरति च भगवान् पाणिनिः 'साक्षाद्द्रष्टरि संज्ञायाम्' (पा.अ.५-२-१९) इति साक्षाज्ज्ञातर्येव साक्षिशब्दम् ।

*अत्रत्यश्रुतप्रकाशिका* - अहं न ज्ञातवानित्यत्र अज्ञानसाक्षित्वेन अहमर्थानुवृत्तिः स्वानुभवसिद्धा, वचनमपि तदनुगुणमित्यनुभववचनाभ्यामहर्थानुवृत्तिनिषेधवाक्यविरोध इत्यर्थः । निषेधशब्दतदर्थानुभवयोर्विरोध इति वाऽर्थः । तत्र मामिति पदस्य अर्थं वक्तुं परप्रश्नमनुभाषते मामितीति । पूर्वं विरुद्धार्थकथनमसाधु; अर्थतत्त्वप्रश्नः साधुरित्यभिप्रायेणाह साध्विति । निषेधानुवृत्त्योर्विषयविभागं दर्शयति तदुच्यत इत्यादिना । अहं मामित्युभयोरपि पदयोर्विशिष्टविषयतैवोचिता रीतिभेदप्रसङ्गादित्यत्राह अहं मामिति । विधिनिषेधयोरेकविषयत्वे व्याघातः स्यादिति तन्निवृत्यर्थं विषयविभागः कार्य इत्यर्थः । विषयविभागविपर्यासशङ्कायां विषयविभागमुचितं दर्शयति जागरितेति । यत् सामग्र्यभावात् तदानीं न प्रकाशते, तदेव निषेधविषयः । यत् अनन्यापेक्षं स्वयं प्रकाशते, तदेवानुवर्त्तत इति, अप्रकाशमानस्यानुवृत्तिः प्रकाशमानस्य निषेधश्चानुपप-

न्नावित्यर्थः । एवं विषयविभागानुगुणमनुभवं दर्शयति अत्रे-ति । शब्दप्रयोगो विवक्षावशात् । धीस्थं सर्वं वदति वा; तदे-कदेशं वदति वा; न किञ्चिदपि वदति वा । अतः शब्दप्रयोगे वैवक्षिकेऽप्यनुभव एकरूपः । स पुनः एवंविषय विभागानुगु-ण एवेत्यर्थः । अनेन 'नाह खल्वयमेवं सम्प्रत्यात्मानं जाना-त्ययमहमस्मि' इति श्रुतिवाक्यस्थायंशब्दो व्याख्यातः ॥

परमतेनेममर्थमुपपादयति किञ्चेत्यादिना । साक्षित्वेनात्मा-ऽभ्युपगम्येत, ततः किमित्यत्राह साक्षित्वं चेति । साक्षाज्ज्ञा-तृत्वम् - साक्षात्काररूपज्ञानाश्रयत्वम् । असाक्षात्कारिणि सा-क्षिशब्दः प्रयुक्तश्चेत्, औपचारिकः । उपपादयति न हीति । अजानतः - अज्ञातुरित्यर्थः । कुत इत्यत्राह ज्ञातैव हीति । शब्दप्रयोगनियामकं लक्षणमाह स्मरतीति । साक्षिशब्दं स्मरतीत्यन्वयः । ततः किमहमर्थस्याऽत्मत्व इत्यत्राह स चेति । अस्मिन्नर्थे अनुमानमुत्तरत्र विस्तरेण विवक्षितम्;

*भावप्रकाशिकायाम्* - अहं न ज्ञातवान् इत्यादि भाष्यं पूर्व-व्याख्यानद्वयानुरोधेन द्वेधा विरोधप्रदर्शनपरतया व्याचष्टे - अहं न ज्ञातवानित्यादिना । विधिनिषेधयोरिति । 'अहम्' इत्यस्य सौषुप्तिकाहमर्थपरामर्शरूपतयाऽहमर्थप्रमाणत्वेन तद्विधिरूप-त्वम्, 'मां न जानामि' इत्यस्यज्ञाननिषेधमुखेनाहमर्थनिषेध-रूपत्वं चेति भावः ।

भाष्ये साक्षित्वं च साक्षात् ज्ञातृत्वमिति । मुख्यज्ञातृत्वमित्यर्थः । ज्ञातृत्वस्य मुख्यत्वं द्रष्टृत्वे पर्यवस्यति । तेन साक्षाच्छब्दस्य कृद्यो (ञ्यो)ग एव गतिसंज्ञा विधानेन ज्ञाधात्वर्थान्वयः कथमिति चोद्यस्य नावकाश इति द्रष्टव्यम् । ननु अजानत इति शतुर्लडादेशतया ज्ञानवर्तमानत्वं विवक्षितं स्यात् । ततश्च तत्साक्षात्काररूपज्ञानात्ययेऽपि 'साक्षी' इति व्यपदेशो न स्यादित्याशङ्क्याह - अज्ञातुरित्यर्थ इति । तृजादेः सर्वकालसाधारणत्वात् तृजादिषु वर्तमानकालोपादानमिति पूर्वपक्षं (तृजादिषु) वर्तमानकालोपादानमध्यायक वेदाध्यायार्थमिति पूर्वपक्षं कृत्वा, 'न वा कालमात्रे दर्शनादन्येषाम्' इति वार्तिककृता सिद्धान्तितत्वादिति

भाष्यम् - स चायं साक्षी प्रतीयमानोऽस्मदर्थ एवेति कुतस्तदानीमहमर्थो न प्रतीयेत । आत्मने स्वयमवभासमानोऽहमित्येवावभासत इति स्वापाद्यवस्थास्वपि आत्मा प्रकाशमानः अहमित्येवावभासत इति सिद्धम् ॥

यत्तु - मोक्षदशायामहमर्थो नानुवर्त्तते - इति; तदपेशलम् । तथासत्यात्मनाश एवापवर्गः प्रकारान्तरेण प्रतिज्ञातः स्यात् । न चाहमर्थो धर्ममात्रम्; येन तद्विगमेऽप्यविद्यानिवृत्ताविव स्वरूपमवतिष्ठेत । प्रत्युत स्वरूपमेवाहमर्थ आत्मनः । ज्ञानं तु

तस्य धर्मः, 'अहं जानामि ज्ञानं मे जातम्' इति चाहमर्थधर्मतया ज्ञानप्रतीतेरेव ॥

अपि च यः परमार्थतो भ्रान्त्या वा आध्यात्मिकादिदुःखैर्दुःखितया स्वात्मानमनुसन्धत्ते 'अहं दुःखी' इति, 'सर्वमेतद्दुःखजातमपुनर्भवमपोह्य कथमहमनाकुलः स्वस्थो भवेयम्' इत्युत्पन्नमोक्षरागः स एव तत्साधने

*श्रुतप्रकाशिका* - अत्र सङ्ग्रहेणाह आत्मने स्वयमिति । आत्मने स्वयमवभासमानोऽहमित्येवावभासत' इति व्याप्तिवचनम्; जाग्रदात्मा सपक्षः; स्वस्मै प्रकाशमानत्वादिति हेतुः । निगमयति स्वापादीति । अविशदावभासस्य सर्वाभ्युपगतत्वात् श्रुतिस्वारस्यात् परामर्शस्वारस्यात् साक्षित्वोपपत्तेः प्रत्यक्त्वसिद्धेश्च सुषुप्तावात्मा अहमिति स्फुरतीत्युक्तं भवति ॥

॥ मुक्तावहमर्थानुवृत्तिसमर्थनम् ॥

अथ मुक्तावहमर्थाननुवृत्तिमनूद्य दूषयति यत्त्वित्यादिना । तुरर्थगौरवविशेषे । अपेशलम् असाध्वित्यर्थः । कुत इत्यत्राह तथासतीति । सौगतान् ज्ञानसन्तत्युच्छेदं मोक्षं वदतः स्वरूपनाशस्य अपुरुषार्थत्वेन दूषयता त्वया शब्दान्तरेण स्वरूपनाश एवोक्तः स्यादित्यर्थः । नैयायिकाद्युक्ते मोक्षेऽप्यपुरुषार्थत्वं तुल्यम् । दुःखनिवृत्तिः सुखप्राप्तिश्चोभयं पुरुषार्थः ।

अत्रापुरुषार्थभूतदुःखाभावात्पुरुषार्थान्वयः, सुखाभावादपुरुषार्थान्वयश्चेति मुक्तेः पुरुषार्थापुरुषार्थमिश्रत्वं हि स्यात् । अहमर्थो ह्यारोपितः; अतस्तद्विगमे स्वरूपनाशो न प्रसजेदित्यत्राह न चेति । कुत इत्यत्राह अहमिति । अहमर्थधर्मतया ज्ञानप्रतीतेरेव । पूर्वोक्तहेतोरेवेत्यर्थः । अहमर्थात्मत्वसमर्थनोपजीवनेन स्वरूपनाशप्रसङ्ग उक्तः । एवं धर्मधर्मिभावेन प्रतीत्या अनुवृत्तिरुपपादिता ॥

अथ श्रुत्यर्थापत्तिमाह अपिचेत्यादिना । पूर्वमहमर्थस्यात्मत्वसमर्थनाय श्रुत्यर्थापत्तिरुक्ता; इदानीमहमर्थस्य मुक्तावनुवृत्त्युपपादनाय तामेव श्रुत्यर्थापत्तिं विस्तरेणाऽऽह । यः स्वात्मानं दुःखिनमनुसन्धत्ते, स एव तन्निवृत्तिसाधने प्रवर्त्तते । स चाहमर्थ एव ॥ दुःखित्वं भ्रान्तिसिद्धमिति चेत् - यः स्वात्मानं भ्रमवन्तमनुसन्धत्ते । स एव भ्रमनिवृत्तिसाधने प्रवर्तते । स चाहमर्थः । द्विचन्द्रज्ञानादिभ्रान्तिमतोऽपि स्वभ्रमनिवृत्तिरेवापेक्षिता; न तु स्वविनाशः । अतोऽहमर्थविनाशोऽपुरुषार्थः इत्यभिप्रायेण परमार्थतो भ्रान्त्या वेत्युक्तम् । अनुसन्धत्त इत्यन्तेन,

*भावप्रकाशिकायाञ्च* - भावः । भाष्ये साक्षाद्द्रष्टर्येवेति । साक्षाच्छब्दात् द्रष्टर्यभिधेये साक्षिशब्दं स्मरतीत्यन्वयः । अनेन सूत्रं व्याख्यातम् । एवं हि सूत्रार्थः-साक्षाच्छब्दात् द्रष्टर्यभिधेये

संज्ञायां विषये इनिप्रत्ययो भवतीति । जाग्रदात्मा सपक्ष इति । आत्मा अहमित्यवभासते, स्वस्मै भासमानत्वात् जाग्रदात्मवदित्यनुमानशरीरम् । न च जाग्रदात्मनः 'अहम्' इति भासमानत्वमसिद्धमिति वाच्यम्, 'अहम्' इति बुद्धेश्चिदचित्संबन्धविषयत्वस्य तैरभ्युपेतत्वात्, 'अहं भूयासम्' इति प्रतीतिबलेनात्मनि परमप्रेमास्पदत्वस्योपपादितत्वाच्च 'अहम्' इति भासमानत्वं जाग्रदात्मनः सिद्धमेवेति सपक्षत्वं युज्यत एवेति मन्तव्यम् ।

**भाष्यम्** - प्रवर्तते । स साधनानुष्ठानेन यद्यहमेव न भविष्यामीत्यवगच्छेत्, अपसर्पेदेवासौ मोक्षकथाप्रस्तावात् । ततश्चाधिकारिविरहादेव सर्वं मोक्षशास्त्रमप्रमाणं स्यात् ॥ अहमुपलक्षितं प्रकाशमात्रमपवर्गे अवतिष्ठत इति चेत् - किमनेन ? मयि नष्टेऽपि किमपि प्रकाशमात्रमपवर्गेऽवतिष्ठत इति मत्वा न हि कश्चिद्बुद्धिपूर्वकारी प्रयतते । अतोऽहमर्थस्यैव ज्ञातृतया सिद्ध्यतः प्रत्यगात्मत्वम् ।

स च प्रत्यगात्मा मुक्तावप्यहमित्येव प्रकाशते स्वस्मै प्रकाशमानत्वात् । यो यः स्वस्मै प्रकाशते स सर्वः अहमित्येव प्रकाशते; यथा तथाऽवभासमानत्वेनोभयवादिसंमतः संसार्यात्मा । यः पुनरहमिति न चकास्ति नासौ स्वस्मै

प्रकाशते, यथा घटादिः । स्वस्मै प्रकाशते चायं मुक्तात्मा । स तस्मादहमित्येव प्रकाशते ॥

*श्रुतप्रकाशिका* - 'निरस्ताखिलदुःखोऽहम्' - इत्यत्रापेक्षितं व्यक्तमुक्तम् । निरस्तेत्यादिश्लोकं विवृणोति । सर्वमेतदित्यादिना । अनाकुलः स्वस्थो भवेयमिति । अपुनर्भवमपोह्येत्येतत्फलितमुक्तम् अनाकुल इति । आगामिदुःखशङ्कया मनःक्षोभः आकुलत्वम्; तदभावोऽनाकुलत्वम् । स्वस्थः - स्वस्मिन् स्थितः, स्वभावे स्थितः, यथावस्थितात्मनानुभवपरः । अनन्तानन्दभागिति फलम् । स एव - पूर्वदुःखित एव । उत्पन्नानिष्टनिवृत्तीष्टप्राप्त्यभिलाषः स एवेत्यर्थः । श्रवणादाविति पूर्वमुक्तत्वादिह तत्साधन इत्येतावदुक्तम् । अपसर्पेदसावित्यादिग्रन्थेन फलितमर्थमाह ततश्चाधिकारीति । श्रवणाद्यायाससाध्यस्य शास्त्रस्यापुरुषार्थपर्यवसायित्वे श्रवणाद्यधिकारिविरहात् श्रवणादिसापेक्षस्य शास्त्रस्य प्रमितिजनकत्वलक्षणं प्रामाण्यं न स्यादित्यर्थः । 'मयि नष्टेपीत्ये'तद्विवृणोति । अहमुपलक्षितमित्यादिना । बुद्धिपूर्वकारीत्यनेन कस्यापीति पदं विवृतम् । श्रुत्यर्थापत्तिं निगमयति अत इति । अहमर्थविगमे ज्ञप्तिसिद्धिरप्यनुसन्धेया । अनुमानमाह स चेति । किञ्च अनुमानमप्यस्तीति चार्थः । अन्वयव्याप्तिमाह योय इति । तथाऽ–वभासमानत्वेन - स्वस्मै प्रकाशमानत्वेन । व्यतिरेकव्याप्तिं

दर्शयति यः पुनरिति । उपनयमाह स्वस्मा इति । निगमनमाह स तस्मादिति । स्वस्मै प्रकाशमानत्वं हेतुः, अहमिति व्यवहारार्हत्वं साध्यमिति न साध्याविशिष्टता । अहमित्येव प्रकाशते - अहमिति व्यवहारार्हं प्रकाशत इत्यर्थः ।

*भावप्रकाशिकायाम्* - ॥ मुक्तावहमर्थानुवृत्तिसमर्थनम् ॥

अपि च यः परमार्थत इति भाष्यस्य, यः परमार्थत आध्यात्मिकादिदुःखैरात्मानम् 'अहं दुःखी' इति दुःखितयानुसंधत्ते, भ्रान्त्या वा आत्मानमनुसंधत्ते 'अहं भ्रान्तिमान्' इति, स एवेति योजना । भ्रान्त्येति इत्थंभूते तृतीयेत्यभिप्रयन्नाह - यः स्वात्मानं भ्रमवन्तमनुसंधत्त इत्यादि । स एव भ्रमनिवृत्तिसाधन इति । दुःखित्वं भ्रान्तिसिद्धमिति वदता हि दुःखित्वनिवृत्तये न प्रवृत्तिर्वक्तुमुचिता, दुःखित्वस्य स्वतो निवृत्तत्वात् । ततश्च 'मम दुःखित्वभ्रान्तिरनुवर्तते, सा निवर्तताम्' इति प्रतिसंधाय भ्रान्तिनिवृत्तिसाधने प्रवर्तत इति वक्तव्यम् । तदपि त्वन्मते अनुभूतेर्न संभवति, भ्रान्तिमत्त्वप्रतिसंधातृत्वस्याप्यनुभूतावभावात् । अतोऽहमर्थस्यैव स्वभ्रान्तिनिवृत्त्यै प्रवृत्तिर्वक्तव्या; न तु स्वविनाशायेत्यर्थः । अनुमानमाहेति । मुक्तावहमिति भासमानत्व इति शेषः । अनुमानमप्यस्तीति चार्थ इति । चशब्दस्य गत्यन्तराभावादेवमन्वयो दर्शित इति द्रष्टव्यम् । तथावभासमानत्वेन इति व्याख्येयं पदम् । स्व-

स्मै भासमानत्वेनेति तद्व्याख्यानम्। अहमिति भासमान-त्वेन चेति शेषः । साध्यसाधनयोरुभयोरपि प्रदर्शनीयत्वादि-ति द्रष्टव्यम् । न साध्याविशिष्टतेति । अहमिति प्रकाशत इत्यस्याहमिति व्यवहारार्हत्वं ह्यर्थः; तच्च संप्रतिपन्नमेव संसारदशायाम् 'अहम्' इति व्यवह्रियमाणतया योग्यतायाः सर्वदा सत्त्वात् (इति?)सिद्धसाधनमिति न वाच्यमित्यर्थः । साध्याविशिष्टत्वम् । साध्यस्य साधनेनाविशिष्टत्वम्, सिद्धत्व-मित्यर्थः । अहमित्येव प्रकाशत इत्येवकारेण सर्वदा व्यवहा-रानुगुण्यं प्रकाशे विवक्षितम् । तत्तु परसंमतं न भवतीति न सिद्धसाधनमित्यर्थः । ततश्चान्यशेषतयाऽवभासमानत्वरूप-स्य संप्रतिपन्नस्य स्वस्मै भासमानत्वस्य, मुक्तौ विप्रतिप-न्नस्य 'अहम्' इति भासमानत्वस्य चैक्याशङ्काया असंभ-वात् कथं साध्याविशिष्टत्वमिति शङ्का निरस्ता ।

**भाष्यम्** - न चाहमिति प्रकाशमानत्वेन तस्याज्ञत्वसंसारि-त्वादिप्रसङ्गः । मोक्षविरोधात् अज्ञत्वाद्यहेतुत्वाच्चाहम्प्रत्य-यस्य । अज्ञानं नाम स्वरूपाज्ञानमन्यथाज्ञानं विपरीतज्ञानं वा । अहमित्येवात्मनस्स्वरूपमिति स्वरूपज्ञानरूपोऽहम्प्रत्य-यो नाज्ञत्वमापादयति; कुतः संसारित्वम्, अपि तु तद्विरोधि-त्वान्नाशयत्येव ॥

ब्रह्मात्मभावापरोक्ष्यनिर्द्धूतनिरवशेषाविद्यानामपि वामदेवादीनामहमित्येवात्मानुभवदर्शनाच्च । श्रूयते हि - 'तद्धैतत् पश्यन्नृषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्चेति', ( बृ.३-४-१०) 'अहमेकः प्रथममासं वर्तामि च भविष्यामि च' (आ.सि. ९) इत्यादि ।

*श्रुतप्रकाशिका* - साध्यविपरीतविशेषसाधकतया विशेषविरुद्धत्वं शङ्कते न चेति । आदिशब्दात् रागद्वेषदुःखादि विवक्षितम् । ननु व्यापकं हि प्रसञ्जनीयम् । न च कार्यं कारणस्य व्यापकम् ॥ सत्यम् । कारणजातीयस्य तु कदाचित्कार्यप्रसक्तिर्व्यापिका । अतोऽहंप्रत्ययेनात्मनोऽज्ञत्वादिप्रसञ्जनम् । अज्ञत्वादिप्रसक्तिः श्रुतिविरुद्धेत्याह मोक्षेति । 'न पश्यो मृत्युं पश्यति न रोगं नोत दुःखता'मिति हि श्रुतिः । अतो यथा सहदर्शनमात्रेण पर्वते भाण्डादिप्रसक्तिः प्रत्यक्षबाधात् वार्यते, तद्वत् कालात्ययापदेश इत्यर्थः । सोपाधिकत्वमाह अज्ञत्वादीति । संसारित्वाहमर्थत्वयोः सहदर्शनमात्रेण मुक्तावपि संसारित्वादिप्रसङ्गश्चेत्, अनुभवस्यापि तत्सहभावदर्शनात् त्वत्पक्षेऽपि मुक्तौ संसारित्वप्रसङ्गः ॥ मोक्षग्राहिप्रमाणविरोधात् कालात्ययापदिष्ट(त्व?)म्, संसारित्वादेरनुभवप्रयुक्तत्वाभावात् सोपाधिकत्वं चेति चेत् - तदस्मत्पक्षेऽपि समानमित्यभिप्रायः । अनेन अहमिति भासनं न स्वस्मै भासमान-

त्वप्रयुक्तम्, अपित्वज्ञत्वप्रयुक्तमिति हेतोः सोपाधिकत्वञ्च श्रुतिबलेन व्याप्तेर्भग्नतया सहदर्शनमात्रमेवेति परिहृतं भवति । एवं कालात्ययापदेशसोपाधिकत्वे उक्ते । तत्र सोपाधिकत्व-मुपपादयितुमज्ञानत्वेन संभावितशिरांसि विकल्पयति अज्ञानं नामेति । धर्म्यैक्ये सति प्रकारान्तरारोपणेन ज्ञानमन्यथा-ज्ञानम्; यथा पीतः शङ्ख इति । इदं रजःकार्यम् । धर्म्यन्तर-स्य धर्म्यन्तरत्वेन ज्ञानं विपरीतज्ञानं; यथा शुक्तौ, इदं रजत-मिति । इदं तमःकार्यम् । 'अयथावत् प्रजानाति बुद्धिः सा पार्थ! राजसी ॥ अधर्मं धर्ममिति या मन्यते तमसा वृता ॥ सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ! तामसी' इति स्मृतेः । अहंप्रत्ययस्य स्वरूपज्ञानरूपत्वात् तत्प्रागभावान्यथाज्ञानवि-परीतज्ञानानि विरोधादेवापगतानीत्याह अहमित्येवेति । अह-मित्येवात्मनः स्वरूपम् - अहमिति व्यवहारबुद्ध्यर्हमेवात्मनः स्वरूपमित्यर्थः । अहम्प्रत्ययस्याज्ञत्वादिप्रयोजकत्वदूषणेना-ज्ञत्वादेरविद्यान्वयः एवोपाधिरित्यर्थादुक्तं भवति । अथवा कार्यकारणभावेन व्याप्तिमङ्गीकृत्य परेणाज्ञत्वादिप्रसङ्ग उक्त इति, व्याप्तिप्रतिक्षेपाय कार्यकारणभावं प्रतिक्षिपति अज्ञ-त्वाद्यहेतुत्वाच्चेत्यादिना । अज्ञत्वफलमपि नास्तीत्याह कुतः संसारित्वमिति ॥

निवृत्ताविद्यानामपि अहमित्यात्मप्रतिपत्तिदर्शनेन अहम्प्रत्ययस्य मुक्तावनुवृत्तिमाह ब्रह्मात्मभावेति । तद्वैतत्पश्यन् इति ब्रह्मात्मकत्वसाक्षात्कारकथनेन निर्धूतनिरवशेषाविद्यत्वं गम्यते ॥

*भावप्रकाशिका* - साध्यविपरीतविशेषसाधकतयेति । पक्षधर्मताबललभ्यस्य साध्यस्य मुक्तनिष्ठस्य 'अहम्' इति भासमानत्वस्य विरुद्धं संसारित्वम् । तत्साधकतयाभिमतविशेषविरुद्धत्वं शङ्कत इत्यर्थः । बाधस्य तर्कानुगुणत्वात् दूषणान्तरमाहेत्याह - सोपाधिकत्वमाहेति । संसारित्वज्ञत्वादिहेतुः कर्मरूपाविद्यान्वयः । सोऽत्र नास्तीति भावः । धर्म्यैक्ये सतीति । संसर्गारोपो रजोजन्यः । तादात्म्यारोपस्तमोजन्य इति भावः । केचित्तु - तद्भिन्ने तदारोपमात्रं रजसा; तद्विरोधिनि तदारोपस्तमसा; यथा धर्मप्रकाशादौ धर्मतमस्त्वादिबुद्धिरित्याहुः । अज्ञत्वाद्यहेतुत्वादित्यस्याविद्यारूपोपाध्यवगमकत्वस्य क्लिष्टत्वात् पक्षान्तरमाह - अथवेति ।

**भाष्यम्** - सकलेतराज्ञानविरोधिनः सच्छब्दप्रत्ययमात्रभाजः परस्य ब्रह्मणो व्यवहारोऽप्येवमेव । 'हन्ताऽहमिमास्तिस्रो देवताः', (छा.६-३-२) 'बहु स्यां प्रजायेय' (छा.६-२), 'स ईक्षत लोकान्नु सृजा इति' (ऐ.१-१) । तथा - 'यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषो-

त्तमः’,(भ.गी.१५-१८) ‘अहमात्मा गुडाकेश’, (भ.गी.१०-२०) ‘न त्वेवाहं जातु नासम्’, (भ.गी.२-१२) ‘अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा’, (भ.गी.७-६) अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते’, (भ.गी.१०-८) ‘तेषामहं समुद्धर्ता मृत्यसंसारसागरात्’, (भ.गी.१२-७) ‘अहं बीजप्रदः पिता’, (भ.गी.१४.४) ‘वेदाहं समतीतानि’(भ.गी.७-२६) इत्यादिषु ॥

यद्यहमित्येवात्मनः स्वरूपम्, कथं तर्ह्यहङ्कारस्य क्षेत्रान्तर्भावो भगवतोपदिश्यते, ‘महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च’ (भ.गी.१३-५) इति ॥ उच्यते । स्वरूपोपदेशेषु सर्वेष्वहमित्येवोपदेशात् तथैवात्मस्वरूपप्रतिपत्तेश्चाहमित्येव प्रत्यगात्मनः स्वरूपम् । अव्यक्तपरिणामभेदस्याहङ्कारस्य क्षेत्रान्तर्भावो भगवतैवोपदिश्यते । स त्वनात्मनि देहेऽहम्भावकरणहेतुत्वेनाहङ्कार इत्युच्यते ।

*श्रुतप्रकाशिका* - ब्रह्मणोऽपि तथा प्रतिपत्तिमाह सकलेतरेति । सकलेतराज्ञानविरोधिनः - न हि सकलेतरविषहरणनिपुणस्य वैनतेयस्य विषवश्यत्वसम्भव इति भावः । सच्छब्दप्रत्ययमात्रभाजः - सच्छब्दस्य सदिति प्रत्ययस्य च विषयभूतस्य । मात्रचा पाश्चात्यनामरूपभाक्त्वव्यावृत्तिः । अनेनाहङ्कारसृष्टेः पूर्वमप्यहम्प्रत्ययं ज्ञापयति । अहम्प्रत्ययस्फुटीकरणाय ‘अहमिमा’ इति वाक्यं पूर्वमुपादत्ते । बहु स्यामिति वाक्ये

‘अस्मद्युत्तम’ इत्युत्तमपुरुषबलादहमिति प्रत्ययसिद्धिः । अहमिमास्तिस्त्र इत्यत्राहंशब्दः कण्ठोक्तः । न ह्यहङ्कारस्य नामरूपव्याकर्तृत्वमिति भावः । बहूपनिषत्सु अहमिति निर्देशज्ञापनायोपादत्ते स ईक्षतेति । सृजा इत्युत्तमपुरुषेणाहंशब्दाकर्षसिद्धिरिति भावः । स्मृतिं दर्शयति तथा यस्मादिति । यस्मादिति वचनं क्षराक्षरातीतस्वाभाविकरूपेणाहम्प्रत्ययज्ञापनार्थमुपात्तम् । न ह्यहङ्कारः क्षराक्षरातीतः । अतो अस्मीत्युत्तमपुरुषेणाप्यहमर्थसिद्धिः । आत्मनो अहम्प्रत्ययं ज्ञापयति - अहमात्मेति । न ह्यहङ्कारश्चिदचिदन्तरात्मा । स्वाभाविकनित्यरूपेऽहम्प्रत्ययं दर्शयति न त्वेवाहमिति । न ह्यहङ्कारो नित्यः । मृत्युविरोधिमुक्तिप्रदोऽप्यहम्प्रत्ययविषय इत्याह तेषामिति । न ह्यहङ्कारो मुक्तिप्रदः । एवमनेकश्रुतिस्मृतिवचनोपादानं परविवक्षितद्वित्रतादृशवचनापनोदनार्थम् । एभिरहंशब्दैश्चिन्मात्रमुपलक्ष्यते चेत् अनेक वाक्यस्थाहंशब्दलक्षणैव दोषः ।

‘महाभूतान्यहङ्कार’ इति क्षेत्रान्तर्भाववचनमेकम्, ‘अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहम् । विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते ॥’ इति त्याज्यत्वपरं वचनं द्वितीयम्, ‘अहङ्कारविमूढात्मा’ इत्यपरम्; एतत्त्रयमनुदाहृतमप्यभिप्रेतम् उतरत्र परिहारात् । पूर्वमेतद्वचनाभिप्रायेण, सुषुप्तिमु-

क्त्योर्नान्वेतीत्युक्तम् । इममर्थमवलम्ब्य चोदयति कथं तर्हीति । परिहरति उच्यत इति । अहमर्थाहङ्कारयोरभेदबुध्या परेण चोदिते प्रकृति प्रत्यययोरर्थविभागव्युत्पादनाय प्रकृत्यर्थभूते आत्मन्यहंबुद्धेः प्रामाणिकत्वस्थैर्यं दर्शयति स्वरूपोपदेशेष्विति । अन्यथासिद्धिं दर्शयन् तत्राहङ्कारशब्दविवक्षितमाह । अव्यक्तेति । अव्यक्तपरिणामभेदस्येति । न त्वहमर्थस्येत्यर्थः । 'अथातोऽहङ्कारादेश' इत्यादिषु शुद्धस्वरूपस्याहङ्कारशब्देनाभिधानाभ्युपगमेऽपि न विरोधः; स त्वहङ्कारशब्दोऽहमर्थविषयबुद्धिपरः । यद्यहङ्कारशब्दवाच्यत्वमात्रात् प्रत्यगात्माऽपि क्षेत्र(जड)भेदः स्यात् - तर्हि हरिशब्दवाच्यत्वसाम्यात् सिंहो मण्डूकः स्यात् । अतोऽनेकार्थाभिधायिशब्दैकत्वमर्थभेदाविरोधीति भावः । यथा आगमप्रामाण्ये 'तथा च हरिशब्दस्य दृष्टा मण्डूकवाचिता ।' इति तच्छब्दवाच्यत्वात्सिंहो मण्डूक एव किम् ॥ तथा गोशब्दवाच्यत्वाच्छब्दश्चापि विषाणवान्' इति । अथाहङ्कारशब्दस्याव्यक्तपरिणामविशेषवाचकत्वप्रकारं दर्शयति स त्विति ।

**भाष्यम्** - अस्य त्वहङ्कारशब्दस्य अभूततद्भावेऽर्थे च्विप्रत्ययमुत्पाद्य व्युत्पत्तिर्द्रष्टव्या । अयमेव त्वहङ्कार उत्कृष्टजनावमानहेतुर्गर्वापरनामा शास्त्रेषु बहुशो हेयतया प्रतिपाद्यते । तस्माद्बाधकापेताऽहम्बुद्धिः साक्षादात्मगोचरैव । शरीरगोचरा

त्वहम्बुद्धिरविद्यैव । यथोक्तं भगवता पराशरेण, 'श्रूयतां चाप्य-विद्यायाः स्वरूपं कुलनन्दन ।

अत्र *श्रुतप्रकाशिका* - अहम्भावः अहमिति बुद्धिः । भावशब्द-स्य बुद्धिवाचकत्वमभिप्रायपरतया प्रयोगादवगम्यते । सर्वत्रा-हंशब्दार्थमेकरूपमङ्गीकृत्याहङ्कारशब्दस्याव्यक्तपरिणामवा-चित्वं शब्दानुशासनप्रक्रिययोपपादयति अस्य त्विति । च्वि-प्रत्ययस्य सर्वलोपः । कृञः करणे घञ्' । क्षेत्रान्तर्भावोपदेश-स्य निर्वाहः कृतः । 'अहङ्कारं बलं दर्पमिति त्याज्यतयोपदे-शस्य निर्वाहः क्रियते अयमेव त्विति । अयंशब्देन प्रस्तुताह-म्भावो विवक्षितः; न त्वहम्भावकरणहेतुः; गर्वापरनामेति वचनात् । न हि महदहङ्कारयोरन्यतरोऽहङ्कारो गर्वापरप-र्यायः । अतोऽत्राहम्भाव एवायंशब्दविवक्षितः । प्रशस्तदेहेऽह-म्बुद्धिरुत्कृष्टजनावमानहेतुः । अहङ्कारः अहम्बुद्धिः । मान-सव्यापारवाचिनः करोतेः बुद्धिपरत्वं युज्यते । यथा 'तदेकाव-यवं देवं चेतसा हि पुनर्बुधः । कुर्यात्' इति । मनसा करणं हि वेदनम् । अतोऽहम्बुद्धिरहङ्कारः । च्विप्रत्ययार्थगर्भत्वात् अनहमि अहम्बुद्धिगर्भौ इमौ अहंभावाहङ्कारशब्दौ । अत्र भावे व्युत्पत्तिः; पूर्वत्र करणे व्युत्पत्तिः । 'गर्वोभिमानोऽहङ्का-र' इति नैघण्टुकाः ॥ ननु कथं भावे (हेये?) व्युत्पन्नस्याह-ङ्कारशब्दस्योपादेयगोचरतया प्रयोगः 'अथातोऽहङ्कारादेश'

इति । उच्यते । स त्वहङ्कारशब्दः साक्षादहमर्थबुद्धिवाची; न त्वनात्मन्यात्मबुद्धिपरच्विप्रत्ययार्थगर्भः । हेयोपादेयरूपेण शब्दप्रतिपन्नयोरहम्बुद्ध्योर्विषयविभागं निगमयति तस्मा-दिति । अस्मिन्नर्थे प्रमाणमाह यथोक्तमिति । तत्रैव पुराणे अनात्मविषयाहम्बुद्धिवचनयोर्भ्रान्तत्वमात्मविषयत्वेत्वभ्रान्त त्वं च स्पष्टम् । यथा, 'आकाशवाय्यवग्निजलपृथिवीभ्यः पृथक्स्थिते । आत्मन्यात्ममयं भावं कः करोति कलेबरे ॥

*अत्रत्यभावप्रकाशिकायाञ्च* - कथं तर्हीति भाष्यमवतारयति - महाभूतान्यहंकार इति क्षेत्रान्तर्भाववचनमेकमित्यादिना । उत्तरत्र परिहारादिति छेदः । अहंभावः अहमिति बुद्धिरिति । ननु करणशब्दस्य बुद्धिपरत्वसंभवात् अहंभावकरणम्, अहंभावप्रतीतिः, अहंत्वप्रतीतिरिति यावदिति कुतो नाश्रीयत इति चेत्-सत्यं तथा स्वारस्यमस्ति । तथापि अयमेवोत्कृष्ट-जनावमानहेतुरित्युत्तरभाष्ये 'अयम्' इत्यनेन करणशब्दार्थः परामर्शानर्हः, तस्यानपुंसकत्वात् । तेन भावशब्दार्थस्य परा-मर्शो वक्तव्यः । अत्र चाहंभावशब्दस्य यद्यहंत्वमर्थः स्यात्, तस्य गर्वशब्दितत्वायोगादसंगतिः स्यात् । अतोऽहंभावशब्दे-नाहंबुद्धिरेव परामृष्टव्येत्यभिप्रायः । अयंशब्देन प्रस्तुताहंभावो विवक्षित इति । अयमेव त्वहंकार इति भाष्यस्य, उत्कृष्टज-नावमानहेतुर्गर्वापरनामायोऽहंकारः शास्त्रेषु हेयतया प्रतिपाद्य-

ते, सोऽयमेवेति योजनेत्यभिप्रायः । इतरथा 'अयमेव त्वहंकार' इत्यनेन प्रस्तुतस्य महत्तत्त्वकार्याहंकारस्यैव परामर्शप्रसङ्गात् । अहंभावलक्षणाहंकारस्य प्रागसिद्धत्वात् । अयमेवाहंकार इति सिद्धवन्निर्देशासंभवाच्च । करोतेर्बुद्धिपरत्वं युक्तमिति । 'शब्ददर्दुरं करोति' इत्यत्र करोतेर्ज्ञानार्थकत्वाभिधानात् । अत एव 'शब्दं करोति, शाब्दिकः' इत्युपपद्यत इति द्रष्टव्यम् । अनहम्यहंबुद्धिगर्भाविमावहंभावाहंकारशब्दाविति बहुषु कोशेषु पाठो दृश्यते । तत्राहंभावशब्दो लेखकस्खलनकृतः । अनात्मनि देहेऽहंभावेत्यत्राहंभावशब्दस्य 'अविद्याऽहंमतिः स्त्रियाम्' इत्यत्राहंमतिशब्दवत् च्विप्रत्ययान्तत्वाभावात् । अत्र भावे व्युत्पत्तिः पूर्वत्र करणे व्युत्पत्तिरित्युपरितनवाक्ये अहंकारशब्दस्यैव व्युत्पत्तिप्रदर्शनाच्च । अत्र भावे व्युत्पत्तिरिति । अनात्मन्यात्मबुद्धिरूपे भ्रमे इत्यर्थः । पूर्वत्रेति । अहंकाराख्ये महत्तत्त्वकार्य इत्यर्थः । उपादेयगोचरतयेति । 'अथातोऽहंकारादेशः' इत्यहंबुद्धेः कर्तव्यत्वाभिधानादिति भावः । स त्वहंकारशब्द इति । अयमत्र विवेकः - अहंकारशब्दो द्विविधः । च्विप्रत्ययान्तादुत्पन्नोऽनुत्पन्नश्च । उत्पन्नश्च द्विविधः - भावसाधनः करणसाधनश्चेति । च्विप्रत्ययान्तादुत्पन्नो भावसाधनो गर्ववाची । च्विप्रत्ययान्तादुत्पन्नः कर-

णवाची त्वहंकारशब्दोऽहंकारतत्त्ववाचीं । अच्व्यन्तोत्पन्नभावसाधनशब्द उपादेयभूताहंप्रत्ययवाचीति ।

**भाष्यम्** - अनात्मन्यात्मबुद्धिर्या' (वि.पु.६-७-१०) इति ॥ यदि ज्ञप्तिमात्रमेवात्मा, तदाऽनात्मन्यात्माभिमाने, शरीरे ज्ञप्तिमात्रप्रतिभासः स्यात्; न ज्ञातृत्वप्रतिभासः । तस्मात् ज्ञाताऽहमर्थ एवात्मा । तदुक्तम् -

'अतः प्रत्यक्षसिद्धत्वादुक्तन्यायागमान्वयात् । अविद्यायोगतश्चात्मा ज्ञाताऽहमिति भासते ॥' (आ.सि.४) इति ।

तथा च, - 'देहेन्द्रियमनःप्राणधीभ्योऽन्योऽनन्यसाधनः । नित्यो व्यापी प्रतिक्षेत्रमात्मा भिन्नस्स्वतस्सुखी ॥' (आ.सि.३) इति ।

अनन्यसाधनः - स्वप्रकाशः । व्यापी - अतिसूक्ष्मतया सर्वाचेतनान्तःप्रवेशस्वभावः ॥

यदुक्तम् - दोषमूलत्वेनान्यथासिद्धिसम्भावनया सकलभेदावलम्बिप्रत्यक्षस्य शास्त्रबाध्यत्वमिति - कोऽयं दोष इति वक्तव्यम्, यन्मूलतया प्रत्यक्षस्यान्यथासिद्धिः ॥ अनादिभेदवासनैव हि दोष इति चेत् - भेदवासनायास्तिमिरादिवत् यथावस्थितवस्तुविपरीतज्ञानहेतुत्वं किमन्यत्र ज्ञातपूर्वम् ॥

*अत्रत्यश्रुतप्रकाशिका* - पञ्चभूतात्मके देहे देही मोहतमोवृतः । अहं ममैतदित्युच्चैः कुरुते कुमतिर्मतिम् ॥' इति । आदिभरतचरिते 'आत्मन्येष न दोषाय शब्दोऽहमिति यो द्विजः । अनात्मन्यात्मविज्ञानं शब्दो वा भ्रान्तिलक्षणः ॥' इति । एतद्वचनार्थमप्यहमर्थात्मत्वहेतुत्वेनाह यदीति । अनात्मनीति । अनात्मन्यहम्प्रतीतिः कथमात्माभिमान इत्यर्थः । अहमर्थात्मत्वं निगमयति तस्मादिति । अस्मिन्नर्थे आत्मसिद्धिग्रन्थमुदाहरति । तदुक्तमिति । धर्मधर्मिभावेन प्रतीतिः, प्रत्यक्षसिद्धिः, स्थिरत्वास्थिरत्वादिवैषम्यम् श्रुत्यर्थापत्तिश्च न्यायः । आगमः उदाहृतोपनिषद्वाक्यानि । अविद्यायोगः - अनन्तरोक्तभ्रान्तियोगः । अहमर्थस्यानात्मत्वे स्थूलोऽहमिति भ्रान्तेरयोग इति वार्थः । ज्ञातुरात्मत्वे संवादिग्रन्थो दर्शितः । ज्ञप्तेरनात्मत्वे चात्मसिद्धिग्रन्थमाह तथा चेति । धीभ्योऽन्य इत्येतदत्रोपयुक्तम् । साधनशब्द(पद?)-स्योत्पादकज्ञापकसाधारणत्वात् तत् व्याचष्टे अनन्येति । जीवस्वरूपविभुत्वशङ्काव्युदासार्थं तत्र व्यापीति शब्दं व्याचष्टे अतिसूक्ष्मेति । पुराणादिषु व्याप्तिशब्दप्रयोगात् स एवात्र श्लोके प्रयुक्तः । यत्र यत्र जीवस्य व्याप्तिवाचिनः शब्दाः, तत्रायमेवार्थो द्रष्टव्य इति भावः । जीवस्य धर्मभूतज्ञानेन व्याप्तिरात्मसिद्धावेवोच्यते,

‘व्याप्तिरपि चैतन्यमात्रेणैव न स्वरूपेणे’ति । अतो यथोक्त एवार्थः ॥

॥ शास्त्रप्रत्यक्षविरोधे शास्त्रप्राबल्यनिरासः ॥

अथ शास्त्रप्रत्यक्षविरोधे शास्त्रप्राबल्यमनूद्य निरस्यति यदुक्त-मित्यादिना । परेण पूर्वम्, ‘मूलमूलिभावपरोक्षापरोक्षरूपत्वा-दिर्न बाध्यबाधकभावे कारणम्; ज्वालाभेदानुमानेन व्यभिचा-रात् । ‘आदित्यो यूप’ इत्यादावपि यूपादित्यैक्याद्यप्रतिपादनं न दौर्बल्यात्; अपि तु यूपाञ्जनविधिशेषत्वेनैक्ये तात्पर्याभा-वात् इत्युक्तम् । तत्र ज्वालाभेदानुमानात् शास्त्रस्य त्रिधा वैषम्यमस्ति प्रमाणान्तरेण दोषमूलत्वानिश्चयादन्योन्याश्र-यः, बाध्यबाधकयोस्तुल्यदोषत्वम्, मूलोच्छेदित्वञ्चेति; एत-त्त्रयं ज्वालाभेदानुमाने नास्ति । तथाहि,-एकवर्तिकावर्त्तित्व-निबन्धनसादृश्याख्यदोषस्य असत्यप्यैक्ये ऐक्यप्रतीतिहेतु-त्वम् अचिरनिर्वापितारोपितप्रदीपे दृष्टमिति,

*भावप्रकाशिकायाञ्च* - ननु ‘श्रूयतां चाप्यविद्यायाः’ इत्यस्मि-न् श्लोके अनात्मन्यात्मबुद्धेः परमनुपादेयत्वमुच्यते, न त्व-नात्मन्यहंबुद्धेः । अतः कथमस्योक्तार्थे प्रमाणत्वमिति श-ङ्कायामाह - अत्रैव पुराण इत्यादिना । अनन्तरोक्तभ्रान्तियोग इति । अनात्मन्यात्मबुद्धिरूपभ्रान्तियोगः इत्यर्थः । अविद्या-

या अयोग इति छेदसंभवमभिप्रेत्य तमेवार्थं विपर्ययतो व्याचष्टे - अहमर्थस्यानात्मत्व इति । भ्रान्तेरयोग इति । आत्मभ्रान्तित्वायोगः इत्यर्थः ।

*श्रुतप्रकाशिका* - चक्षुषा ज्वालैक्यप्रतिपत्तेः क्वचित् दोषमूलत्वनिश्चयात् अन्यत्रैक्यप्रतिपत्तावपि दोषमूलत्वसम्भवात् ज्वालैक्यप्रत्यक्षं शङ्कितं न निश्चयजननक्षमं परीक्षकस्य भवेत् । ज्वालायां सादृश्यरूपदोषस्य असत्यप्यैक्ये ऐक्यप्रतीतिहेतुत्वं प्रमाणान्तरेण न दृष्टं चेत्, अन्योन्याश्रयः स्यात् - अनुमानस्य प्राबल्यात् प्रत्यक्षस्यान्यथासिद्धिः, तदन्यथासिद्ध्याऽनुमानस्य प्राबल्यमिति; ऐक्यप्रतीतेरन्यथासिद्धिसम्भवः प्रमाणान्तरदृष्ट इति नान्योन्याश्रयः । अत्र न तथा प्रमाणान्तरेण भेदवासनाया दोषत्वं दृष्टम् । किञ्च दीपे बाध्यस्य ज्वालैक्यज्ञानस्य सादृश्याख्यदोषमूलत्वे बाधकस्य ज्वालाभेदानुमानस्य न सादृश्यदोषमूलत्वं दृष्टम् । अत्र तु बाध्यस्य प्रत्यक्षस्य बाधकस्य शास्त्रस्य चोभयोः पराभ्युपेतदोषमूलत्वमविशिष्टं विद्यत इति तुल्यदोषत्वम् । किञ्च तत्र ज्वालाख्यधर्मिग्राहिणः प्रत्यक्षस्य च प्रथमवर्त्यवयवाग्निसंयोगे चरमवर्त्यवयवस्य विनाशे च उत्पत्तिविनाशयोर्व्याप्तिग्राहिणः प्रत्यक्षस्य, प्रत्यवयवमग्निसंयोगवर्त्यवयवविनाशाख्यलिङ्गग्राहिणः प्रत्यक्षस्य च न भेदानुमानबाध्यविषयक-

त्वम् । ऐक्यप्रतिपत्तेरेव तत् । अत्र तु शब्दाख्यधर्मिग्राहिणः तस्य निर्दोषत्वसाधकलिङ्गग्राहिणः तल्लिङ्गव्याप्तिग्राहिणः षड्विधतात्पर्यलिङ्गग्राहिणश्च प्रत्यक्षस्य तेषां तात्पर्यलिङ्गानां च शास्त्रेणैव बाधोपगमान्मूलोच्छेदित्वमिति त्रिधा वैषम्यम् । एतद्वैषम्यत्रयमुपपादयिष्यन् पूर्वपक्षमनुवदति दोषमूलत्वेनेति । सकलभेदावलम्बिप्रत्यक्षस्येति । अत्रायं भावः - तत्त्वशुद्धिकारादिभिः कैश्चित् काचतिमिरादिरेव प्रत्यक्षस्य दोष उक्तः । स नोपपद्यते; काचतिमिरादेः क्वाचित्कत्वात् । एतेन प्रत्यक्षान्तराणां दोषमूलत्वमनुमीयते चेत्, शब्दत्वात् शास्त्रस्यापि दोषमूलत्वमनुमीयताम् ॥ शास्त्रे दोषस्य योग्यानुपलम्भनिरासश्चेत्, प्रत्यक्षेऽपि तथैव स्यात् । किञ्च आयुर्वेदे दोषाणां स्वरूपं तन्निवृत्त्युपायादिकं च निरूपितम् । सर्वप्रत्यक्षस्य दोषमूलत्वानुमानं तद्विरुद्धं च । किञ्च सर्वप्रत्यक्षस्य दोषमूलत्वे सन्मात्रग्राहिणः प्रत्यक्षस्य च दोषमूलत्वात् सन्मात्रमपि मिथ्या स्यादिति दूषयति कोऽयमित्यादिना । कोऽयं दोष इति वक्तव्यमिति । कोऽयं दोष इत्यनया वचनव्यक्त्या दोषरूपं मूलं यदुक्तं, तत् किमिति पृष्टे अयं दोष इति वक्तव्यमित्यर्थः । यद्वा यच्छब्दसामर्थ्यात् तत्रेत्याक्षेपसिद्धम् । दोषमूलत्वेनेत्यादिना यदर्थजातमुक्तम्, तत्र कोऽयं दोष इति पृष्टे, वक्तव्यमित्यर्थः । कुतो वक्तव्यमि-

त्यत्राह यन्मूलतयेति । न हि दोषमनुक्त्वाऽन्यथासिद्धिः सुवचेत्यर्थः । दोषमाह अनादीति । स्वरूपसम्प्रतिपत्तिपर एवकारः । हि शब्देन दोषान्तरासम्भवसिद्धवत्कारः । स्वमते दोषत्वसम्प्रतिपत्त्यभिमानाद्वा हि शब्दः । दोषत्वं हि विपरीतज्ञानहेतुत्वम् । अतो विपरीतज्ञानहेतुत्वेन व्याप्तेरदृष्टतया भेदवासनास्वरूपसम्प्रतिपत्तावपि दोषत्वासम्प्रतिपत्तेः पृच्छति भेदवासनाया इति । तिमिरादिवदिति । आदिशब्देन सादृश्यादि विवक्षितम् ।

*भावप्रकाशिकायाञ्च* -॥ प्रत्यक्षविरोधे शास्त्रप्राबल्यनिरासः ॥

एतेन प्रत्यक्षान्तराणां दोषमूलत्वमनुमीयते चेदिति । केषुचित् प्रत्यक्षेषु काचादिदोषमूलत्वदर्शनेन प्रत्यक्षान्तराणां काचादिदोषमूलत्वमनुमीयते चेदित्यर्थः । एवमुत्तरत्र सर्वत्रापि दोषपदं काचादिदोषपरं द्रष्टव्यम् । ततश्च मुख्यमृषावादिनः स्वैकदेशिनं प्रति स्वव्याघातकरीयमुक्तिः कथं स्यादिति शङ्का निरस्ता । कोऽयं दोष इति भाष्यस्य यदुक्तमित्यनेनान्वयं घटयितुमुपायं प्रदर्शयति - कोऽयं दोष इत्यनया वचनव्यक्त्येति । दोषमूलत्वेनान्यथासिद्धिसंभावनया सकलभेदप्रत्यक्षस्य शास्त्रबाध्यत्वमिति यत् दोषरूपमूलमुक्तम्, तत् किमित्येवं 'को दोष' इति वचनव्यक्त्या पृष्ट इत्यर्थः । यदुक्तमिति नपुंसकस्य को दोष इति पुंलिङ्गस्य च सामानाधिक-

रण्यसंपादनस्यातिक्लिष्टत्वादन्यथा व्याचष्टे - यद्वा यच्छब्द-सामर्थ्यादिति । हेतुत्वेन व्याप्तेरदृष्टतयेति । भेदवासनात्व-स्येति शेषः । भेदवासनाया विपरीतज्ञानहेतुत्वेन व्याप्तेः = साकल्येन संबन्धस्येत्यर्थः ।

**भाष्यम्** - अनेनैव शास्त्रविरोधेन ज्ञास्यत इति चेत् न; अ-न्योन्याश्रयणात् - शास्त्रस्य निरस्तनिखिलविशेषवस्तुबोधि-त्वनिश्चये सति भेदवासनाया दोषत्वनिश्चयः, भेदवासनाया दोषत्वनिश्चये सति शास्त्रस्य निरस्तनिखिलविशेषवस्तुबोधि-त्वनिश्चय इति । किञ्च यदि भेदवासनामूलत्वेन प्रत्यक्षस्य विपरीतार्थत्वम्, शास्त्रमपि तन्मूलत्वेन तथैव स्यात् ॥ अथो-च्येत - दोषमूलत्वेऽपि शास्त्रस्य प्रत्यक्षावगतसकलभेदनिर-सनज्ञानहेतुत्वेन परत्वात् तत् प्रत्यक्षस्य बाधकमिति - तन्न; दोषमूलत्वे ज्ञाते सति परत्वमकिञ्चित्करम् । रज्जुस-र्पज्ञाननिमित्तभये सति भ्रान्तोऽयमिति परिज्ञातेन केनचित् 'नायं सर्पः; मा भैषीः' इत्युक्तेऽपि भयानिवृत्तिदर्शनात् । शास्त्र-स्य च दोषमूलत्वं श्रवणवेलायामेव ज्ञातम् । श्रवणावगतनि-खिलभेदोपमर्दिब्रह्मात्मैकत्वविज्ञानाभ्यासरूपत्वान्मननादेः ॥

*अत्रत्यश्रुतप्रकाशिका* - तद्धि ज्वालायामैक्यभ्रमहेतुः । अन्यत्र ज्ञातपूर्वत्वस्य दुर्वचत्वाच्छङ्कते अनेनैवेति । दूषयति नेति । एवं प्रमाणान्तरेण दोषत्वानिश्चयेनान्योन्याश्रयणापत्तिरूप-

वैषम्यमुक्तम् । अथ तुल्यदोषत्वं बाध्यबाधकयोराह किञ्चेति । अथ दोषमूलत्वे तुल्येऽपि परत्वाद्बाधकत्वं शङ्कते अथेति । अपच्छेदादिषु, इदं रजतम्, नेदं रजतमित्यादिषु च परं बाधकं दृष्टम्; अतो निषेध्योपस्थापकमानापेक्षया निषेधकस्य परत्वात् बलीयस्त्वमित्यर्थः । एवं ब्रह्मप्रतिपादकशास्त्रस्यापि व्युत्पत्त्यादेः प्रत्यक्षादिमूलतया तत्पूर्वकस्य तस्य प्रत्यक्षाद्यपेक्षया परत्वात् तत्प्रतिपाद्यनिर्विशेषवस्तुसत्यत्वमपि तुल्यन्यायतया सिद्धम् । तद्दूषयति तन्नेति । परत्वस्याकिञ्चित्करत्वमुपपादयति रज्जुसर्पेति । उत्तरज्ञानस्य दोषमूलत्वेन प्रामाण्याऽनिश्चयाद्भयानिवृत्तिः । ननु भ्रान्तत्वे ज्ञाते परत्वमकिञ्चित्करमस्तु; अत्र तु भ्रान्तत्वज्ञानं नास्तीत्यत्राह शास्त्रस्य चेति । ज्ञातत्वमुपपादयति श्रवणावगतेति । शास्त्रस्य भेदवासनामूलत्वं तावत्सम्प्रतिपन्नम् । तस्याश्च दोषत्वं भेदमिथ्यात्वज्ञानादवगम्यते । तन्मिथ्यात्वावगतिश्च ज्ञाननिवर्त्यत्वावगमात् । ज्ञाननिवर्त्यत्वावगमश्च ब्रह्मात्मैकत्वज्ञानस्य निखिलभेदोपमर्दित्वावगतेः । अत ईदृशनिवर्तकज्ञानाभ्यासरूपमननं कुर्वता शास्त्रस्य दोषमूलत्वमवगतमित्यर्थः ।

*भावप्रकाशिकायाञ्च* - भाष्ये श्रवणावगतनिखिलभेदोपमर्दीति । श्रवणवेलायां निखिलभेदोपमर्दित्वेन प्रकारेणावगतस्य ब्रह्मात्मैकत्वविज्ञानस्याभ्यासरूपत्वान्मननादेरित्यर्थः । न च

मननस्य ब्रह्मात्मैकत्वविज्ञानाभ्यासरूपत्वेऽपि ब्रह्मात्मैकत्वविज्ञानस्य निखिलभेदोपमर्दित्वाभ्यासरूपत्वं किमर्थमिति शङ्कनीयम्, ब्रह्मात्मैकत्वसिद्ध्यर्थं तदितरमिथ्यात्वसिद्ध्यै ब्रह्मात्मैकत्वविज्ञानस्य भेदोपमर्दित्वस्य चिन्त्यत्वात् । आरम्भणाधिकरणे मननात्मकत्वचिन्तायाः क्रियमाणत्वाच्च । भेदवासनामूलत्वं तावत् संप्रतिपन्नमिति । प्रकृतिप्रत्ययादिभेदवासनामूलत्वादिति भावः । तस्याश्च दोषत्वमिति । ननु दोषस्य भ्रान्तिकल्प्यत्वाद्वेदान्तजन्यचिन्मात्रविषयकज्ञानस्य प्रामात्वेन दोषजन्यत्वं कुतः कल्प्यत इति चेत् - न; वृत्तिरूपज्ञानस्यापि ब्रह्मव्यतिरिक्तत्वेन मिथ्यात्वात् दोषजन्यत्वस्यावश्यकत्वात्, योग्यताभ्रमजन्यतया शास्त्रजन्यज्ञानस्यापि भ्रमत्वस्य वक्तव्यत्वाच्चेति भावः । मिथ्यात्वावगतिश्च ज्ञाननिवर्त्यत्वावगमादिति । ननु श्रवणवेलायां ब्रह्मव्यतिरिक्तमिथ्यात्वस्य 'नेह नानास्ति' इति शास्त्रेणैव प्रतीतेः मिथ्यात्वावगतेश्च दोषमूलत्वेन भेदवासनाया एव दोषत्वं पर्यवस्यतीति । ऋजुमार्गे सति किमनेन वक्रमार्गाश्रयणेनेति चेत् - अत्र केचित् - ननु श्रवणवेलायां दोषजन्यत्वं नावगतम्, आरम्भणाधिकरण एव ब्रह्मव्यतिरिक्तमिथ्यात्वस्य, भेदप्रतीतेर्दोषजन्यत्वस्य च निरूप्यमाणतया आरम्भणाधिकरणस्य च मननात्मकद्वितीयाध्यायगतत्वात् श्रवणवेलायां दो-

षजन्यत्वाज्ज्ञानात् शास्त्रजन्यज्ञानस्य परतया बाधकत्वं भविष्यतीत्याशङ्कानिराकरणार्थं श्रवणावगतेत्यादि भाष्यम् । ततश्च मननस्य श्रवणावगतार्थदृढीकरणार्थतया श्रवणवेलायामपि भेदमिथ्यात्वप्रतीत्यवश्यंभावेन तत्प्रतीतेर्दोषजन्यत्वप्रतीत्यवश्यंभावात् । अन्यथा श्रवणकालीनशास्त्रजन्यावगतेः परत्वेऽपि भेदमिथ्यात्वाविषयत्वेन बाधकत्वाप्रसक्तेरिति भाव इत्याहुः ॥

इयता श्रीभाष्योक्तप्रत्यगात्मस्वरूपस्य सम्यग्विवेचनपुरस्सरं भाष्य व्याख्याभूत-श्रुतप्रकाशिकया तद्व्याख्यारूप-भावप्रकाशिकया च साकं विवृतमिति प्रारम्भोक्तावस्थाशब्दनिर्वचनेन द्रव्यस्यागन्तुकापृथक्सिद्धधर्मत्वात् जन्माद्यवस्थात्रयं, स्वरूप-स्थिति-प्रवृत्तिरूपावस्थात्रयान्तरं, उत्क्रान्तिगत्यागतिरूपावस्थात्रयान्तरं, परमात्मनोऽपि तत्प्रतियोगित्वेन तादृशावस्थात्रययोगः इत्यादयः सुगमाः ।

पराङ्कुशसूरिभिः परकालसूरिप्रभृतिभिरपि द्राविडवेदे स्वस्वप्रबन्धे ज्ञानस्वरूपत्वं ज्ञानगुणकत्वं बह्ववस्थावत्त्वं च चेतनानां सम्यक् उपपादितमस्ति । शब्दादिप्रकृतिगुणानां ग्राहकश्रोत्रादिकरणानां यथा आश्रयत्वेन द्रव्यापेक्षा, तद्वदेव ज्ञानानन्दादीनां आत्मगुणानाम् अनुभवाय धर्मी आत्मा अहमर्थः फली अपेक्षितः इति स एव अहमर्थः ॥

चेतनानां ईश्वरस्य च साधारणधर्माः ज्ञानस्वरूपत्वं ज्ञानगुणकत्वं चेति प्रमाणसिद्धम्, उभयोः प्रत्यक्त्वात् । परन्तु अणुत्व-विभुत्व, आधेयत्व-आधारत्व, नियाम्यत्व-नियन्तृत्व, पारतन्त्र्य-स्वातन्त्र्य, शेषत्व-शेषित्वादिना भेदः ।

ईदृशस्य प्रत्यक्त्वयुक्तस्य जीवस्य संसरतः प्राणाधिपः संचरति स्वकर्मभिः इत्युक्तरीत्या स्वपूर्वकर्मानुगुणं विभिन्नदेवादिदेहपरिग्रहः, तेषु च शरीरेषु अधिष्ठातृत्वेन तदभेदेन देवोऽहमित्यादिप्रत्ययाः तदनुगुणप्रवृत्तयश्च तस्यावस्थाभेदं प्रापयन्ति । जन्माद्यधिकरणे जन्म, स्थिति, लय, पुरुषार्थप्रवृत्तिरूपविविधक्रियासम्बन्धः चेतनानां परस्मात् ब्रह्मणः इति तैत्तिरीयश्रुत्यनुसारेण स्थाप्यते । चेतनानाचेतनानां जन्मादौ कारणभूतस्य ब्रह्मणोऽपि चेतनक्रियाप्रतियोगित्वेन प्रेरण, साक्षित्व, अनुमन्तृत्व, कारयितृत्वादिबहुप्रकारेण ब्रह्मणोऽपि सङ्कल्पभेदाः तस्मिन् प्रतिसम्बन्धिभूतावस्थाविशेषापादने प्रभवन्तीति आधारत्व, नियन्तृत्व, शेषित्व, फलप्रदत्वादिवेषेण तस्य अखिलभुवनजन्मस्थेभङ्गादिलीलत्वं तत्तदवस्थाभिः उन्नीयन्ते ।

श्रुतयश्च - यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति । तद्विजिज्ञासस्व । तदब्रह्म । इति, तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः

इत्यादिषु समष्टितत्त्वस्रष्टृत्वं, सर्वाणि रूपाणि विचित्य धीरः । नामानि कृत्वाऽभिवदन् यदास्ते । इति, हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि, तासां त्रिवृतं त्रिवृतमेकैकां करवाणि इति नामरूपव्याकर्तृत्वं, स्वप्नावस्थायां चेतनानां तत्तत्कालमात्रवर्तिनां तत्तत्पुरुषमात्रानुभाव्यानां पदार्थानां सृष्टृत्वं, जन्मादिषु,

संसारबन्ध-स्थितिमोक्षहेतुः, ध्यात्वा देवं मुच्यते सर्वपाशैः, तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशम्, को ह्येवान्यात् कः प्राण्यात् । यदेष आकाश आनन्दो न स्यात् । एष ह्येवानन्दयाति, यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्, तमेवं विद्वानमृत इह भवति, नान्यः पन्था अयनाय विद्यते, इति प्राप्यप्रापकभावे,

एष एव साधु कर्म कारयति तं यमुन्निनीषति, एष एवासाधु कर्म कारयति तं यमधोनिनीषति, इष्टापूर्तं बहुधा जातं जायमानं विश्वं बिभर्ति भुवनस्य नाभिः, इत्यादौ फलप्रदत्व, कारयितृत्वे,

साक्षी चेता केवलो निर्गुणश्च, न तस्य कार्यं करणं च विद्यते, सर्वमिदमभ्यात्तोऽवाक्यनादरः, (परात्तु तच्छ्रुतेः, कृतप्रयत्नापे-

क्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः इति सूत्राभ्यां च), इत्यौदासीन्ये,

पिता माता भ्राता निवासः शरणं सुहृद्गतिर्नारायणः, स एव पुत्रः स पिता स माता, स नो बन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा । यो देवानां नामधा एक एव, ब्रह्मविदाप्नोति परम्, यो वेद निहितं गुहायां परमे व्योमन् । सोऽश्नुते सर्वान् कामान् सह । ब्रह्मणा विपश्चितेति, वाचस्पतिं विश्वकर्माणमूतये मनोयुजं वाजे अद्या हुवेम, मुमुक्षुर्वै शरणमहं प्रपद्ये, वसुरण्यो विभूरसि प्राणे त्वमसि सन्धाता ब्रह्मन् त्वमसि विश्वसृक्तेजोदास्त्वमस्यग्नेः वर्चोदास्त्वमसि सूर्यस्य द्युम्नोदास्त्वमसि चन्द्रमस उपयामगृहीतोऽसि ब्रह्मणे त्वा महस ओमित्यात्मानं युञ्जीत एतद्वै महोपनिषदं देवानां गुह्यम् इत्यादि शरण्यत्वे, सर्वविधबन्धुत्वे, वात्सल्यादिगुणयोगे च,

स तपस्तप्त्वा । इदँ सर्वमसृजत । तत्सृष्ट्वा । तदेवानु प्राविशत् । तदनुप्रविश्य । सच्च त्यच्चाभवत् । इत्यादौ स्रष्टृत्व, अन्तः प्रवेश, नियमनादिकं, यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः, इत्यारभ्य सर्वतत्वेषु, यः आत्मनि तिष्ठन् आत्मनोऽन्तरो यमात्मा

न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः, इति पर्यन्तम् अन्तर्यामित्वं, भूतस्य जातः पतिरेक आसीत् । स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम, एक इद्राजा जगतो बभूव । य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम, यो देवेष्वधि देव एक आसीत्कस्मै देवाय हविषा विधेमेत्यादिषु सर्गादिलीलत्वं देवशब्देन क्रीडार्थकप्रधानेन, (न प्रयोजनव-त्वात्, लोकवत्तु लीलाकैवल्यम् इति सूत्रयोः),

जन्माद्यतिरिच्य, अन्तःप्रवेश, नियमन, मोक्षप्रदत्वादिकं ज-गज्जन्मस्थितिध्वंसमहानन्दैकहेतवे, त्वदाश्रितानां जगदुद्भ-वस्थितिप्रणाशसंसारविमोचनादयः भवन्ति लीलाविधयश्च वै-दिकाः त्वदीयगम्भीरमनोऽनुसारिणः, इत्यादिषु प्रसिध्यन्ति । अतः तादृशप्रमाणवेद्यस्य परस्य पुंसः श्रीमतो नारायणस्य वरिवस्यारूपेण लेखनकैङ्कर्यमिदं प्रवर्तितम् ।

प्रकृतिपुरुषकालव्यक्तमुक्ता यदिच्छामनुविदधति नित्यं नि-त्यसिद्धैरनेकैः । स्वपरिचरणभोगैः श्रीमति प्रीयमाणे भवतु मम परस्मिन् श्रीसखे भक्तिभूमा ॥ इति शम् ॥

वक्ता श्रोता वचनविषयः प्रीयतां श्रीनृसिंहः ॥ शुभमस्तु ॥

-=-=-=-=-=